# नामलिङ्गानुशासनम्



Edited by

asit k panja

Amitabha Mapdar

Rakseh Narayanan V

www.ayurvedah.in

aarsha, jaipur

ISBN

## अमरसिंह कृत

# नामलिङ्गानुशासनम्

(nāmaliṅgānuśāsanam)

Edited by

asit k panja

&

Amitabha Mapdar

Rakesh Narayanan V

aarsha, jaipur

Plot no. 4, Khandelwal nagar Extn,
Near Premnagar pulia, Agra Road,
Jaipur- 302031, Rajasthan

www.ayurvedah.in

**Publisher** : **aarsha**

**Edition** : **First; March 2015**

**ISBN** :

**Price** : **FREE**

Composing and editing: **bapan neogi**

Cover page: **Rajarshi**

For any information, feedback and requirement of this book, please mail to :

aarshaayurveda@gmail.com www.ayurvedah.in

Published by **bapan neogi** on behalf of **aarsha** ,

**aarsha**, jaipur
Plot no. 4, Khandelwal nagar Extn,
Near Premnagar pulia, Agra Road,
Jaipur- 302031, Rajasthan

www.ayurvedah.in

# नामलिङ्गानुशासनम्

## प्रथमकाण्डम्

यस्य ज्ञानदयासिन्धोरगाधस्यानघा गुणाः ।
सेव्यतामक्षयो धीराः स श्रिये चामृताय च ।। [1]

समाहृत्यान्यतन्त्राणि संक्षिप्तैः प्रतिसंस्कृतैः ।
सम्पूर्णमुच्यते वर्गैर्नामलिङ्गानुशासनम् ।। [2]

प्रायशो रूपभेदेन साहचर्याच्च कुत्रचित्।
स्त्रीपुंनपुंसकं ज्ञेयं तद्विशेषविधेः क्वचित्।। [3]

भेदाख्यानाय न द्वंद्वो नैकशेषो न संकरः ।
कृतोऽत्र भिन्नलिङ्गानामनुक्तानां क्रमाद् ऋते ।। [4]

त्रिलिङ्ग्यां त्रिष्विति पदं मिथुने तु द्वयोरिति ।
निषिद्धलिङ्गं शेषार्थं त्वन्ताथादि न पूर्वभाक् ।। [5]

## अथ स्वर्गवर्गः

स्वरव्ययं स्वर्गनाकत्रिदिवत्रिदशालयाः ।
सुरलोको द्योदिवौ द्वे स्त्रियां क्लीबे त्रिविष्टपम् ।। [6]

अमरा निर्जरा देवास्त्रिदशा विबुधाः सुराः ।
सुपर्वाणः सुमनसस्त्रिदिवेशा दिवौकसः ।। [7]

आदितेया दिविषदो लेखा अदितिनन्दनाः ।
आदित्या ऋभवोऽस्वप्ना अमर्त्या अमृतान्धसः ।। [8]

बर्हिर्मुखाः क्रतुभुजो गीर्वाणा दानवारयः ।
वृन्दारका दैवतानि पुंसि वा देवताः स्त्रियाम् ।। [9]

PUBLISHED by **aarsha, jaipur : aarshaayurveda@gmail.com**

आदित्यविश्ववसवस्तुषिताभास्वरानिलाः ।
महाराजिकसाध्याश्च रुद्राश्च गणदेवताः ।। [10]

विद्याधराप्सरोयक्षरक्षोगन्धर्वकिन्नराः ।
पिशाचो गुह्यकः सिद्धो भूतोऽमी देवयोनयः ।। [11]

असुरा दैत्यदैतेयदनुजेन्द्रारिदानवाः ।
शुक्रशिष्या दितिसुताः पूर्वदेवाः सुरद्विषः ।। [12]

सर्वज्ञः सुगतः बुद्धो धर्मराजस्तथागतः ।
समन्तभद्रो भगवान्मारजिल्लोकजिज्जिनः ।। [13]

षडभिज्ञो दशबलोऽद्वयवादी विनायकः ।
मुनीन्द्रः श्रीघनः शास्ता मुनिः शाक्यमुनिस्तु यः ।। [14]

स शाक्यसिंहः सर्वार्थसिद्धः शौद्धोदनिश्च सः ।
गौतमश्चार्कबन्धुश्च मायादेवीसुतश्च सः ।। [15]

ब्रह्मात्मभूः सुरज्येष्ठः परमेष्ठी पितामहः ।
हिरण्यगर्भो लोकेशः स्वयंभूश्चतुराननः ।। [16]

धाताब्जयोनिर्द्रुहिणो विरिञ्चिः कमलासनः ।
स्रष्टा प्रजापतिर्वेधा विधाता विश्वसृग्विधिः ।। [17]

नाभिजन्माण्डजः पूर्वो निधनः कमलोद्भवः ।
सदानन्दो रजोमूर्तिः सत्यको हंसवाहनः ।। [18]

विष्णुर्नारायणः कृष्णो वैकुण्ठो विष्टरश्रवाः ।
दामोदरो हृषीकेशः केशवो माधवः स्वभूः ।। [19]

दैत्यारिः पुण्डरीकाक्षो गोविन्दो गरुडध्वजः ।
पीताम्बरोऽच्युतः शार्ङ्गी विष्वक्सेनो जनार्दनः ।। [20]

उपेन्द्र इन्द्रावरजश्चक्रपाणिश्चतुर्भुजः ।
पद्मनाभो मधुरिपुर्वासुदेवस्त्रिविक्रमः ।। [21]



www.ayurvedah.in

देवकीनन्दनः शौरिः श्रीपतिः पुरुषोत्तमः ।
वनमाली बलिध्वंसी कंसारातिरधोक्षजः ।। [22]

विश्वम्भरः कैटभजिद्विधुः श्रीवत्सलाञ्छनः ।
पुराणपुरुषो यज्ञपुरुषो नरकान्तकः ।। [23]

जलशायी विश्वरूपो मुकुन्दो मुरमर्दनः ।
वसुदेवोऽस्य जनकः स एवानकदुन्दुभिः ।। [24]

बलभद्रः प्रलम्बघ्नो बलदेवोऽच्युताग्रजः ।
रेवतीरमणो रामः कामपालो हलायुधः ।। [25]

नीलाम्बरो रौहिणेयस्तालाङ्को मुसली हली ।
संकर्षणः सीरपाणिः कालिन्दीभेदनो बलः ।। [26]

मदनो मन्मथो मारः प्रद्युम्नो मीनकेतनः ।
कन्दर्पो दर्पकोऽनङ्गः कामः पञ्चशरः स्मरः ।। [27]

शम्बरारिर्मनसिजः कुसुमेषुरनन्यजः ।

पुष्पधन्वा रतिपतिर्मकरध्वज आत्मभूः ।। [28]

अरविन्दमशोकं च चूतं च नवमल्लिका ।

नीलोत्पलं च पञ्चैते पञ्चबाणस्य सायकाः ।। [29]

उन्मादनस्तापनश्च शोषणः स्तम्भनस्तथा ।

सम्मोहनश्च कामश्च पञ्च बाणाः ।। [30]

ब्रह्मसूर्विश्वकेतुः स्यादनिरुद्ध उषापतिः ।

लक्ष्मीः पद्मालया पद्मा कमला श्रीर्हरिप्रिया ।। [31]

इन्दिरा लोकमाता मा क्षीरोदतनया रमा ।

भार्गवी लोकजननी क्षीरसागरकन्यका ।। [32]

शङ्खो लक्ष्मीपतेः पाञ्चजन्यश्चक्रं सुदर्शनः ।

कौमोदकी गदा खड्गो नन्दकः कौस्तुभो मणिः ।। [33]



www.ayurvedah.in

चापः शार्ङ्गं मुरारेस्तु श्रीवत्सो लाञ्छनं स्मृतम् ।
अश्वाश्च शैब्यसुग्रीवमेघपुष्पबलाहकाः ।। [34]

सारथिर्दारुको मन्त्री ह्युद्धवश्चानुजो गदः ।
गरुत्मान्गरुडस्तार्क्ष्यो वैनतेयः खगेश्वरः ।। [35]

नागान्तको विष्णुरथः सुपर्णः पन्नगाशनः ।
शम्भुरीशः पशुपतिः शिवः शूली महेश्वरः ।। [36]

ईश्वरः शर्व ईशानः शंकरश्चन्द्रशेखरः ।
भूतेशः खण्डपरशुर्गिरीशो गिरिशो मृडः ।। [37]

मृत्युंजयः कृत्तिवासाः पिनाकी प्रमथाधिपः ।
उग्रः कपर्दी श्रीकण्ठः शितिकण्ठः कपालभृत्।। [38]

वामदेवो महादेवो विरूपाक्षस्त्रिलोचनः ।
कृशानुरेताः सर्वज्ञो धूर्जटिर्नीललोहितः ।। [39]

हरः स्मरहरो भर्गस्त्र्यम्बकस्त्रिपुरान्तकः ।
गङ्गाधरोऽन्धकरिपुः क्रतुध्वंसी वृषध्वजः ।। [40]

व्योमकेशो भवो भीमः स्थाणू रुद्र उमापतिः ।
अहिर्बुध्न्योऽष्टमूर्तिश्च गजारिश्च महानटः ।। [41]

कपर्दोऽस्य जटाजूटः पिनाकोऽजगवं धनुः ।
प्रमथाः स्युः पारिषदा ब्राह्मीत्याद्यास्तु मातरः ।। [42]

विभूतिर्भूतिरैश्वर्यमणिमादिकमष्टधा ।
अणिमा महिमा चैव गरिमा लघिमा तथा ।। [43]

प्राप्तिः प्राकाम्यमिशित्वं वशित्वं चाष्ट सिद्धयः ।
उमा कात्यायनी गौरी काली हैमवतीश्वरी ।। [44]

शिवा भवानी रुद्राणी शर्वाणी सर्वमङ्गला ।
अपर्णा पार्वती दुर्गा मृडानी चण्डिकाम्बिका ।। [45]



www.ayurvedah.in

आर्या दाक्षायणी चैव गिरिजा मेनकात्मजा ।
कर्ममोटी तु चामुण्डा चर्ममुण्डा तु चर्चिका ।। [46]

विनायको विघ्नराजद्वैमातुरगणाधिपाः ।
अप्येकदन्तहेरम्बलम्बोदरगजाननाः ।। [47]

कार्त्तिकेयो महासेनः शरजन्मा षडाननः ।
पार्वतीनन्दनः स्कन्दः सेनानीरग्निभूर्गुहः ।। [48]

बाहुलेयस्तारकजिद्विशाखः शिखिवाहनः ।
षाण्मातुरः शक्तिधरः कुमारः क्रौञ्चदारणः ।। [49]

शृङ्गी भृङ्गी रिटिस्तुण्डी नन्दिको नन्दिकेश्वरः ।
इन्द्रो मरुत्वान्मघवा बिडौजाः पाकशासनः ।। [50]

वृद्धश्रवाः सुनासीरः पुरुहूतः पुरंदरः ।
जिष्णुर्लेखर्षभः शक्रः शतमन्युर्दिवस्पतिः ।। [51]

सुत्रामा गोत्रभिद्वज्री वासवो वृत्रहा वृषा ।
वास्तोष्पतिः सुरपतिर्बलारातिः शचीपतिः ।। [52]

जम्भभेदी हरिहयः स्वाराण्नमुचिसादनः ।
संक्रन्दनो दुश्च्यवनस्तुराषाण्मेघवाहनः ।। [53]

आखण्डलः सहस्राक्ष ऋभुक्षास्तस्य तु प्रिया ।
पुलोमजा शचीन्द्राणी नगरी त्वमरावती ।। [54]

हय उच्चैःश्रवाः सूतो मातलिर्नन्दनं वनम् ।
स्यात्प्रासादो वैजयन्तो जयन्तः पाकशासनिः ।। [55]

ऐरावतोऽभ्रमातङ्गैरावणाभ्रमुवल्लभाः ।
ह्रादिनी वज्रमस्त्री स्यात्कुलिशं भिदुरं पविः ।। [56]

शतकोटिः स्वरुः शम्बो दम्भोलिरशनिर्द्वयोः ।
व्योमयानं विमानोऽस्त्री नारदाद्याः सुरर्षयः ।। [57]



www.ayurvedah.in

स्यात्सुधर्मा देवसभा पीयूषममृतं सुधा ।
मन्दाकिनी वियद्गङ्गा स्वर्णदी सुरदीर्घिका ।। [58]

मेरुः सुमेरुहेमाद्री रत्नसानुः सुरालयः ।
पञ्चैते देवतरवो मन्दारः पारिजातकः ।। [59]

संतानः कल्पवृक्षश्च पुंसि वा हरिचन्दनम् ।
सनत्कुमारो वैधात्रः स्वर्वैद्यावश्विनीसुतौ ।। [60]

नासत्यावश्विनौ दस्रावाश्विनेयौ च तावुभौ ।
स्त्रियां बहुष्वप्सरसः स्वर्वेश्या उर्वशीमुखाः ।। [61]

हाहा हाहाश्चैवमाद्या गन्धर्वास्त्रिदिवौकसाम् ।
अग्निर्वैश्वानरो वह्निर्वीतिहोत्रो धनंजयः ।। [62]

कृपीटयोनिर्ज्वलनो जातवेदास्तनूनपात्।
बर्हिः शुष्मा कृष्णवर्त्मा शोचिष्केश उपर्बुधः ।। [63]



www.ayurvedah.in

आश्रयाशो बृहद्भानुः कृशानुः पावकोऽनलः ।
रोहिताश्वो वायुसखः शिखावानाशुशुक्षणिः ।। [64]

हिरण्यरेता हुतभुग्दहनो हव्यवाहनः ।
सप्तार्चिर्दमुनाः शुक्रश्चित्रभानुर्विभावसुः ।। [65]

शुचिरप्पित्तमौर्वस्तु वाडबो वडबानलः ।
वह्नेर्द्वयोर्ज्वालकीलावर्चिर्हेतिः शिखाः स्त्रियाम् ।। [66]

त्रिषु स्फुलिङ्गोऽग्निकणः संतापः संज्वरः समौ ।
उल्का स्यान्निर्गतज्वाला भातिर्भसितभस्मनी ।। [67]

क्षारो रक्षा च दावस्तु दवो वनहुताशनः ।
धर्मराजः पितृपतिः समवर्ती परेतराट् ।। [68]

कृतान्तो यमुनाभ्राता शमनो यमराड्यमः ।
कालो दण्डधरः श्राद्धदेवो वैवस्वतोऽन्तकः ।। [69]



www.ayurvedah.in

राक्षसः कोणपः क्रव्यात्क्रव्यादोऽस्रप आशरः ।
रात्रिञ्चरो रात्रिचरः कर्बुरो निकषात्मजः ।। [70]

यातुधानः पुण्यजनो नैर्ऋतो यातुरक्षसी ।
प्रचेता वरुणः पाशी यादसांपतिरप्पतिः ।। [71]

श्वसनः स्पर्शनो वायुर्मातरिश्वा सदागतिः ।
पृषदश्वो गन्धवहो गन्धवाहानिलाशुगाः ।। [72]

समीरमारुतमरुत्जगत्प्राणसमीरणाः ।
नभस्वद्वातपवनपवमानप्रभञ्जनाः ।। [73]

प्रकम्पनो महावातो झञ्झावातः सवृष्टिकः ।
प्राणोऽपानः समानश्चोदानव्यानौ च वायवः ।। [74]

शरीरस्था इमे रंहस्तरसी तुरयः स्यदः ।
जवोऽथ शीघ्रं त्वरितं लघु क्षिप्रमरं द्रुतम् ।। [75]

सत्वरं चपलं तूर्णमविलम्बितमाशु च ।
सततेऽनारताश्रान्तसंतताविरतानिशम् ।। [76]

नित्यानवरताजस्रमप्यथातिशयो भरः ।
अतिवेलभृशात्यर्थातिमात्रोद्गाढनिर्भरम् ।। [77]

तीव्रैकान्तनितान्तानि गाढबाढदृढानि च ।
क्लीबे शीघ्राद्यसत्त्वे स्यात्त्रिष्वेषां सत्त्वगामि यत्।। [78]

कुबेरस्त्र्यम्बकसखो यक्षराड्गुह्यकेश्वरः ।
मनुष्यधर्मा धनदो राजराजो धनाधिपः ।। [79]

किन्नरेशो वैश्रवणः पौलस्त्यो नरवाहनः ।
यक्षैकपिङ्गैलविलश्रीदपुण्यजनेश्वराः ।। [80]

अस्योद्यानं चैत्ररथं पुत्रस्तु नलकूबरः ।
कैलासः स्थानमलका पूर्विमानं तु पुष्पकम् ।। [81]

स्यात्किन्नरः किम्पुरुषस्तुरंगवदनो मयुः ।
निधिर्ना शेवधिर्भेदाः पद्मशङ्खादयो निधेः ।। [82]

महापद्मश्च पद्मश्च शङ्खो मकरकच्छपौ ।
मुकुन्दकुन्दनीलाश्च खर्वश्च निधयो नव ।। [83]

इति स्वर्गवर्गः

## अथव्योमवर्गः

द्योदिवौ द्वे स्त्रियामभ्रं व्योम पुष्करमम्बरम् ।
नभोऽन्तरिक्षं गगनमनन्तं सुरवर्त्म खम् ।। [84]

वियद्विष्णुपदं वा तु पुंस्याकाशविहायसी ।
विहासयोऽपि नाकोऽपि द्युरपि स्यात्तदव्ययम् ।। [85]

तारापथोऽन्तरिक्षं च मेघाध्वा च महाबिलम् ।
विहायाः शकुने पुंसि गगने पुंनपुंसकम् ।। [86]

# अथ दिग्वर्गः

दिशस्तु ककुभः काष्ठा आशाश्च हरितश्च ताः ।
प्राच्यवाचीप्रतीच्यस्ताः पूर्वदक्षिणपश्चिमाः ।। [87]

उत्तरा दिगुदीची स्याद्दिश्यं तु त्रिषु दिग्भवे ।
अवाग्भवमवाचीनमुदीचीनमुदग्भवम् ।। [88]

प्रत्यग्भवं प्रतीचीनं प्राचीनं प्राग्भवं त्रिषु ।
इन्द्रो वह्निः पितृपतिर्नैर्ऋतो वरुणो मरुत्।। [89]

कुबेर ईशः पतयः पूर्वादीनां दिशां क्रमात्।
रविः शुक्रो महीसानुः स्वर्भानुर्भानुजो विधुः ।। [90]

बुधो बृहस्पतिश्चेति दिशां चैव तथा ग्रहाः ।
ऐरावतः पुण्डरीको वामनः कुमुदोऽञ्जनः ।। [91]



www.ayurvedah.in

पुष्पदन्तः सार्वभौमः सुप्रतीकश्च दिग्गजाः ।
करिण्योऽभ्रमुकपिलापिङ्गलानुपमाः क्रमात्।। [92]

ताम्रकर्णी शुभ्रदन्ती चाङ्गना चाञ्जनावती ।
क्लीबाव्ययं त्वपदिशं दिशोर्मध्ये विदिक्स्त्रियाम् ।। [93]

अभ्यन्तरं त्वन्तरालं चक्रवालं तु मण्डलम् ।
अभ्रं मेघो वारिवाहः स्तनयित्नुर्बलाहकः ।। [94]

धाराधरो जलधरस्तडित्वान्वारिदोऽम्बुभृत्।
घनजीमूतमुदिरजलमुग्धामयोनयः ।। [95]

कादम्बिनी मेघमाला त्रिषु मेघभवेऽभ्रियम् ।
स्तनितं गर्जितं मेघनिर्घोषे रसितादि च ।। [96]

शम्पा शतह्रदाह्रादिन्यैरावत्यः क्षणप्रभा ।
तडित्सौदामनी विद्युच्चञ्चला चपला अपि ।। [97]

स्फूर्जथुर्वज्रनिर्घोषो मेघज्योतिरिरंमदः ।
इन्द्रायुधं शक्रधनुस्तदेव ऋजुरोहितम् ।। [98]

वृष्टिवर्षं तद्विघातेऽवग्राहावग्रहौ समौ ।
धारासम्पात आसारः शीकरोऽम्बुकणाः स्मृताः ।। [99]

वर्षोपलस्तु करका मेघच्छन्नेऽहनि दुर्दिनम् ।
अन्तर्धा व्यवधा पुंसि त्वन्तर्धिरपवारणम् ।। [100]

अपिधानतिरोधानपिधानाच्छादनानि च ।
हिमांशुश्चन्द्रमाश्चन्द्र इन्दुः कुमुदबान्धवः ।। [101]

विधुः सुधांशुः शुभ्रांशुरोषधीशो निशापतिः । [
अब्जो जैवातृकः सोमो ग्लौर्मृगाङ्कः कलानिधिः ।। [102]

द्विजराजः शशधरो नक्षत्रेशः क्षपाकरः । [
कला तु षोडशो भागो बिम्बोऽस्त्री मण्डलं त्रिषु ।। [103]



www.ayurvedah.in

भित्तं शकलखण्डे वा पुंस्यर्धोऽर्धं समेऽशके ।
चन्द्रिका कौमुदी ज्योत्स्ना प्रसादस्तु प्रसन्नता ।। [104]

कलङ्काङ्कौ लाञ्छनं च चिह्नं लक्ष्म च लक्षणम् ।
सुषमा परमा शोभा शोभा कान्तिर्द्युतिश्छविः ।। [105]

अवश्यायस्तु नीहारस्तुषारस्तुहिनं हिमम् ।
प्रालेयं मिहिका चाथ हिमानी हिमसंहतिः ।। [106]

शीतं गुणे तद्वदर्थाः सुषीमः शिशिरो जडः ।
तुषारः शीतलः शीतो हिमः सप्तान्यलिङ्गकाः ।। [107]

ध्रुव औत्तानपादिः स्यादगस्त्यः कुम्भसम्भवः ।
मैत्रावरुणिरस्यैव लोपामुद्रा सधर्मिणी ।। [108]

नक्षत्रमृक्षं भं तारा तारकाप्युडु वा स्त्रियाम् ।
दाक्षायिण्योऽश्विनीत्यादितारा अश्वयुगश्विनी ।। [109]

राधाविशाखा पुष्ये तु सिध्यतिष्यौ श्रविष्ठया ।
समा धनिष्ठाः स्युः प्रोष्ठपदा भाद्रपदाः स्त्रियः ।। [110]

मृगशीर्षं मृगशिरस्तस्मिन्नेवाग्रहायणी ।
इल्वलास्तच्छिरोदेशे तारका निवसन्ति याः ।। [111]

बृहस्पतिः सुराचार्यो गीष्पतिर्धिषणो गुरुः ।
जीव आङ्गिरसो वाचस्पतिश्चित्रशिखण्डिजः ।। [112]

शुक्रो दैत्यगुरुः काव्य उशना भार्गवः कविः ।
अङ्गारकः कुजो भौमो लोहिताङ्गो महीसुतः ।। [113]

रौहिणेयो बुधः सौम्यः समौ सौरिशनैश्चरौ ।
तमस्तु राहुः स्वर्भानुः सैंहिकेयो विधुन्तुदः ।। [114]

सप्तर्षयो मरीच्यत्रिमुखाश्चित्रशिखण्डिनः ।
राशीनामुदयो लग्नं ते तु मेषवृषादयः ।। [115]



www.ayurvedahi.in

सूरसूर्यार्यमादित्यद्वादशात्मदिवाकराः ।
भास्कराहस्करब्रध्नप्रभाकरविभाकराः ।। [116]

भास्वद्विवस्वत्सप्ताश्वहरिदश्वोष्णरश्मयः ।
विकर्तनार्कमार्तण्डमिहिरारुणपूषणः ।। [117]

द्युमणिस्तरणिर्मित्रश्चित्रभानुर्विरोचनः ।
विभावसुर्ग्रहपतिस्त्विषांपतिरहर्पतिः ।। [118]

भानुर्हंसः सहस्रांशुस्तपनः सविता रविः ।
पद्माक्षस्तेजसांराशिश्छायानाथस्तमिस्रहा ।। [119]

कर्मसाक्षी जगच्चक्षुर्लोकबन्धुस्त्रयीतनुः ।
प्रद्योतनो दिनमणिः खद्योतो लोकबान्धवः ।। [120]

इनो भगो भामनिधिश्चांशुमाल्यब्जिनीपतिः ।
माठरः पिङ्गलो दण्डश्चण्डांशोः पारिपार्श्विकाः ।। [121]



www.ayurvedah.in

सूरसूतोऽरुणोऽनूरुः काश्यपिर्गरुडाग्रजः ।
परिवेषस्तुपरिधिरुपसूर्यकमण्डले ।। [122]

किरणोस्त्रमयूखांशुगभस्तिघृणिरश्मयः ।
भानुः करो मरीचिः स्त्रीपुंसयोर्दीधितिः स्त्रियाम् ।। [123]

स्युः प्रभा रुग्रुचिस्त्विड्भाभाश्छविद्युतिदीप्तयः ।
रोचिः शोचिरुभे क्लीबे प्रकाशो द्योत आतपः ।। [124]

कोष्णं कवोष्णं मन्दोष्णं कदुष्णं त्रिषु तद्वति ।
तिग्मं तीक्ष्णं खरं तद्वन्मृगतृष्णा मरीचिका ।। [125]

## अथ कालवर्गः

कालो दिष्टोऽप्यनेहापि समयोऽप्यथ पक्षतिः ।
प्रतिपद्वे इमे स्त्रीत्वे तदाद्यास्तिथयो द्वयोः ।। [126]



www.ayurvedah.in

घस्रो दिनाहनी वा तु क्लीबे दिवसवासरौ ।
प्रत्यूषोऽहर्मुखं कल्यमुषःप्रत्युषसी अपि ।। [127]

व्युष्टं विभातं द्वे क्लीबे पुंसि गोसर्ग इष्यते ।
प्रभातं च दिनान्ते तु सायं संध्या पितृप्रसूः ।। [128]

प्राह्णापराह्णमध्याह्नस्त्रिसंध्यमथ शर्वरी ।
निशा निशीथिनी रात्रिस्त्रियामा क्षणदा क्षपा ।। [129]

विभावरीतमस्विन्यौ रजनी यामिनी तमी ।
तमिस्रा तामसी रात्रिर्ज्यौत्स्नी चन्द्रिकयान्विता ।। [130]

आगामिवर्तमानाहर्युक्तायां निशि पक्षिणी ।
गणरात्रं निशा बह्व्यः प्रदोषो रजनीमुखम् ।। [131]

अर्धरात्रनिशीथौ द्वौ द्वौ यामप्रहरौ समौ ।
स पर्वसंधिः प्रतिपत्पञ्चदश्योर्यदन्तरम् ।। [132]

पक्षान्तौ पञ्चदश्यौ द्वे पौर्णमासी तु पौर्णिमा ।
कलाहीने सानुमतिः पूर्णे राका निशाकरे ।। [133]

अमावास्या त्वमावस्या दर्शः सूर्येन्दुसंगमः ।
सा दृष्टेन्दुः सिनीवाली सा नष्टेन्दुकला कुहूः ।। [134]

उपरागो ग्रहो राहुग्रस्ते त्विन्दौ च पूष्णि च ।
सोपप्लवोपरक्तौ द्वौ अग्न्युत्पात उपाहितः ।। [135]

एकयोक्त्या पुष्पवन्तौ दिवाकरनिशाकरौ ।
अष्टादश निमेषास्तु काष्ठा त्रिंशत्तु ताः कला ।। [136]

तास्तु त्रिंशत्क्षणस्ते तु मुहूर्तो द्वादशास्त्रियाम् ।
ते तु त्रिंशदहोरात्रः पक्षस्ते दशपञ्च च ।। [137]

पक्षौ पूर्वापरौ शुक्लकृष्णौ मासस्तु तावुभौ ।
द्वौ द्वौ मार्गादि मासौ स्यादृतुस्तैरयनं त्रिभिः ।। [138]



www.ayurvedah.in

अयने द्वे गतिरुदग्दक्षिणार्कस्य वत्सरः ।
समरात्रिदिवे काले विषुवद्विषुवं च तत्।। [139]

पुष्ययुक्ता पौर्णमासी पौषी मासे तु यत्र सा ।
नाम्ना स पौषो माघाद्याश्चैवमेकादशापरे ।। [140]

मार्गशीर्षे सहा मार्ग आग्रहायणिकश्च सः ।
पौषे तैषसहस्यौ द्वौ तपा माघेऽथ फाल्गुने । [141]

स्यात्तपस्यः फाल्गुनिकः स्याच्चैत्रे चैत्रिको मधुः ॥
वैशाखे माधवो राधो ज्येष्ठे शुक्रः शुचिस्त्वयम् । [142]

आषाढे श्रावणे तु स्यान्नभाः श्रावणिकश्च सः ।
स्युर्नभस्यप्रौष्ठपदभाद्रपदाः समाः। [143]

स्यादाश्विन इषोऽप्याश्वयुजोऽपि स्यात्तु कार्तिके ।
कार्तिकिको हेमन्तः शिशिरोऽस्त्रियाम् ।। [144]

वसन्ते पुष्पसमयः सुरभिर्ग्रीष्म ऊष्मकः ।
निदाघ उष्णोपगम उष्ण ऊष्मागमस्तपः ।। [145]

स्त्रियां प्रावृट् स्त्रियां भूम्नि वर्षा अथ शरत्स्त्रियाम् ।
षडमी ऋतवः पुंसि मार्गादीनां युगैः क्रमात्।। [146]

संवत्सरो वत्सरोऽब्दो हायनोऽस्त्री शरत्समाः ।
मासेन स्यादहोरात्रः पैत्रो वर्षेण दैवतः ।। [147]

दैवे युगसहस्रे द्वे ब्राह्मः कल्पौ तु तौ न णाम् ।
मन्वन्तरं तु दिव्यानां युगानामेकसप्ततिः ।। [148]

संवर्तः प्रलयः कल्पः क्षयः कल्पान्त इत्यपि ।
अस्त्री पङ्कं पुमान्पाप्मा पापं किल्बिषकल्मषम् ।। [149]

कलुषं वृजिनैनोऽघमंहो दुरितदुष्कृतम् ।
स्याद्धर्ममस्त्रियां पुण्यश्रेयसी सुकृतं वृषः ।। [150]



www.ayurvedah.in

मुत्प्रीतिः प्रमदो हर्षः प्रमोदामोदसम्मदाः ।
स्यादानन्दथुरानन्दः शर्मशातसुखानि च ।। [151]

श्वः श्रेयसं शिवं भद्रं कल्याणं मङ्गलं शुभम् ।
भावुकं भविकं भव्यं कुशलं क्षेममस्त्रियाम् ।। [152]

शस्तं चाथ त्रिषु द्रव्ये पापं पुण्यं सुखादि च ।
मतल्लिका मचर्चिका प्रकाण्डमुद्धतल्लजौ ।। [153]

प्रशस्तवाचकान्यमून्ययः शुभावहो विधिः ।
दैवं दिष्टं भागधेयं भाग्यं स्त्री नियतिर्विधिः ।। [154]

हेतुर्ना कारणं बीजं निदानं त्वादिकारणम् ।
क्षेत्रज्ञ आत्मा पुरुषः प्रधानं प्रकृतिः स्त्रियाम् ।। [155]

विशेषः कालिकोऽवस्था गुणाः सत्त्वं रजस्तमः ।
जनुर्जननजन्मानि जनिरुत्पत्तिरुद्भवः ।। [156]

प्राणी तु चेतनो जन्मी जन्तुजन्युशरीरिणः ।
जातिर्जातं च सामान्यं व्यक्तिस्तु पृथगात्मता ।। [157]

चित्तं तु चेतो हृदयं स्वान्तं हृन्मानसं मनः ।

## अथ धीवर्गः

बुद्धिर्मनीषा धिषणा धीः प्रज्ञा शेमुषी मतिः ।। [158]

प्रेक्षोपलब्धिश्चित्संवित्प्रतिपज्ज्ञप्तिचेतनाः ।
धीर्धारणावती मेधा संकल्पः कर्म मानसम् ।। [159]

अवधानं समाधानं प्रणिधानं तथैव च ।
चित्ताभोगो मनस्कारश्चर्चा संख्या विचारणा ।। [160]

विमर्शो भावना चैव वासना च निगद्यते ।
अध्याहारस्तर्क ऊहो विचिकित्सा तु संशयः ।। [161]

www.ayurvedah.in

संदेहद्वापरौ चाथ समौ निर्णयनिश्चयौ ।
मिथ्यादृष्टिर्नास्तिकता व्यापादो द्रोहचिन्तनम् ।। [162]

समौ सिद्धान्तराद्धान्तौ भ्रान्तिर्मिथ्यामतिर्भ्रमः ।
संविद् आगूः प्रतिज्ञानं नियमाश्रवसंश्रवाः ।। [163]

अङ्गीकाराभ्युपगमप्रतिश्रवसमाधयः ।
मोक्षे धीर्ज्ञानमन्यत्र विज्ञानं शिल्पशास्त्रयोः ।। [164]

मुक्तिः कैवल्यनिर्वाणश्रेयोनिःश्रेयसामृतम् ।
मोक्षोऽपवर्गोऽथाज्ञानमविद्याहंमतिः स्त्रियाम् ।। [165]

रूपं शब्दो गन्धरसस्पर्शाश्च विषया अमी ।
गोचरा इन्द्रियार्थाश्च हृषीकं विषयीन्द्रियम् ।। [166]

कर्मेन्द्रियं तु पाय्वादि मनोनेत्रादि धीन्द्रियम् ।
तुवरस्तु कषायोऽस्त्री मधुरो लवणः कटुः ।। [167]

तिक्तोऽम्लश्च रसाः पुंसि तद्वत्सु षडमी त्रिषु ।
विमर्दोत्थे परिमलो गन्धे जनमनोहरे ।। [168]

आमोदः सोऽतिनिर्हारी वाच्यलिङ्गत्वमागुणात्।
समाकर्षी तु निर्हारी सुरभिर्घ्राणतर्पणः ।। [169]

इष्टगन्धः सुगन्धिः स्यादामोदी मुखवासनः ।
पूतिगन्धस्तु दुर्गन्धो विस्रं स्यादामगन्धि यत्।। [170]

शुक्लशुभ्रशुचिश्वेतविशदश्येतपाण्डराः ।
अवदातः सितो गौरो वलक्षो धवलोऽर्जुनः । [171]

हरिणः पाण्डुरः पाण्डुः ईषत्पाण्डुस्तु धूसरः ।
कृष्णे नीलासितश्यामकालश्यामलमेचकाः। [172]

पीतो गौरो दरिद्राभः पालाशो हरित हरित् ।
लोहितो रोहितो रक्तः शोणः कोकनदच्छविः । [173]

PUBLISHED by **aarsha, jaipur : aarshaayurveda@gmail.com**

www.ayurvedahi.in

अव्यक्तरागस्त्वरुणः श्वेतरक्तस्तु पाटलः ।
श्यावः श्यात्कपिशो धूम्रधूमलौ कृष्णलोहिते ।। [174]

कडारः कपिलः पिङ्गपिशङ्गौ कद्रुपिङ्गलौ ।
चित्रं किर्मीरकल्माषशबलैताश्च कर्बुरे ।। [175]

गुणे शुक्लादयः पुंसि गुणिलिङ्गास्तु तद्वति ।

## अथ शब्दादिवर्गः

ब्राह्मी तु भारती भाषा गीर्वाग्वाणी सरस्वती ।। [176]

व्याहार उक्तिर्लपितं भाषितं वचनं वचः ।
अपभ्रंशोऽपशब्दः स्याच्छास्त्रे शब्दस्तु वाचकः ।। [177]

तिङ् सुबन्तचयो वाक्यं क्रिया वा कारकान्विता ।
श्रुतिः स्त्री वेद आम्नायस्त्रयी धर्मस्तु तद्विधिः ।। [178]

स्त्रियामृक्सामयजुषी इति वेदास्त्रयस्त्रयी ।
शिक्षेत्यादि श्रुतेरङ्गमोंकारप्रणवौ समौ ।। [179]

इतिहासः पुरावृत्तमुदात्ताद्यास्त्रयः स्वराः ।
आन्वीक्षिकी दण्डनीतिस्तर्कविद्यार्थशास्त्रयोः ।। [180]
आख्यायिकोपलब्धार्था पुराणं पञ्चलक्षणम् ।
प्रबन्धकल्पना कथा प्रवह्लिका प्रहेलिका ।। [181]

स्मृतिस्तु धर्मसंहिता समाहृतिस्तु संग्रहः ।
समस्या तु समासार्था किंवदन्ती जनश्रुतिः ।। [182]

वार्त्ता प्रवृत्तिर्वृत्तान्त उदन्तः स्यादथाह्वयः ।
आख्याह्वे अभिधानं च नामधेयं च नाम च ।। [183]

हूतिराकारणाह्वानं संहूतिर्बहुभिः कृता ।
विवादो व्यवहारः स्यादुपन्यासस्तु वाङ्मुखम् ।। [184]

उपोद्घात उदाहारः शपनं शपथः पुमान्।
प्रश्नोऽनुयोगः पृच्छा च प्रतिवाक्योत्तरे समे ।। [185]

मिथ्याभियोगोऽभ्याख्यानमथ मिथ्याभिशंसनम् ।
अभिशापः प्रणादस्तु शब्दः स्यादनुरागजः ।। [186]

यशः कीर्तिः समज्ञा च स्तवः स्तोत्रं स्तुतिर्नुतिः ।
आम्रेडितं द्विस्त्रिरुक्तमुच्चैर्घुष्टं तु घोषणा ।। [187]

काकुः स्त्रियां विकारो यः शोकभीत्यादिभिर्ध्वनेः ।
अवर्णाक्षेपनिर्वादपरीवादापवादवत्।। [188]

उपक्रोशो जुगुप्सा च कुत्सा निन्दा च गर्हणे ।
पारुष्यमतिवादः स्याद्भर्त्सनं त्वपकारगीः ।। [189]

यः सनिन्द उपालम्भस्तत्र स्यात्परिभाषणम् ।
तत्र त्वाक्षारणा यः स्यादाक्रोशो मैथुनं प्रति ।। [190]

स्याद् आभाषणमालापः प्रलापोऽनर्थकं वचः ।
अनुलापो मुहुर्भाषा विलापः परिदेवनम् ।। [191]

विप्रलापो विरोधोक्तिः संलापो भाषणं मिथः ।
सुप्रलापः सुवचनमपलापस्तु निह्नवः ।। [192]

चोद्यमाक्षेपाभियोगौ शापाक्रोशौ दुरेषणा ।
अस्त्री चाटु चटु श्लाघा प्रेम्णा मिथ्याविकत्थनम् ।। [193]

संदेशवाग्वाचिकं स्याद्वाग्भेदास्तु त्रिषूत्तरे ।
रुशती वागकल्याणी स्यात्कल्या तु शुभात्मिका ।। [194]

अत्यर्थमधुरं सान्त्वं संगतं हृदयंगमम् ।
निष्ठुरं परुषं ग्राम्यमश्लीलं सूनृतं प्रिये ।। [195]

सत्येऽथ संकुलक्लिष्टे परस्परपराहते ।
लुप्तवर्णपदं ग्रस्तं निरस्तं त्वरितोदितम् ।। [196]



www.ayurvedahi.in

जम्बूकृतं सनिष्ठीवमबद्धं स्यादनर्थकम् ।
अनक्षरमवाच्यं स्यादाहतं तु मृषार्थकम् ।। [197]

सोल्लुठनं तु सोत्प्रासं मणितं रतिकूजितम् ।
श्राव्यं हृद्यं मनोहारि विस्पष्टं प्रकटोदितम् ।। [198]

अथ म्लिष्टमविस्पष्टं वितथं त्वनृतं वचः ।
सत्यं तथ्यमृतं सम्यगमूनि त्रिषु तद्वति ।। [199]

शब्दे निनादनिनदध्वनिध्वानरवस्वनाः ।
स्वाननिर्घोषनिर्ह्रादनादनिस्वाननिस्वनाः ।। [200]

आरवारावसंरावविरावा अथ मर्मरः ।
स्वनिते वस्त्रपर्णानां भूषणानां तु शिञ्जितम् ।। [201]

निक्वाणो निक्वणः क्वाणः क्वणः क्वणनमित्यपि ।
वीणायाः क्वणिते प्रादेः प्रक्वाणप्रक्वणादयः ।। [202]



www.ayurvedah.in

कोलाहलः कलकलस्तिरश्चां वाशितं रुतम् ।
स्त्री प्रतिश्रुत्प्रतिध्वाने गीतं गानमिमे समे ।। [203]

## अथ नाट्यवर्गः

निषादर्षभगान्धारषड्जमध्यमधैवताः ।
पञ्चमश्चेत्यमी सप्त तन्त्रीकण्ठोत्थिताः स्वराः ।। [204]

काकली तु कले सूक्ष्मे ध्वनी तु मधुरास्फुटे ।
कलो मन्द्रस्तु गम्भीरे तारोऽत्युच्चैस्त्रयस्त्रिषु ।। [205]

न णामुरसि मध्यस्थो द्वाविंशतिविधो ध्वनिः ।
स मन्द्रः कण्ठमध्यस्थस्तारः शिरसि गीयते ।। [206]

समन्वितलयस्त्वेकतालो वीणा तु वल्लकी ।
त्रिपञ्ची सा तु तन्त्रीभिः सप्तभिः परिवादिनी ।। [207]

PUBLISHED by **aarsha, jaipur : aarshaayurveda@gmail.com**

www.ayurvedah.in

ततं वीणादिकं वाद्यमानद्धं मुरजादिकम् ।
वंशादिकं तु सुषिरं कांस्यतालादिकं घनम् ।। [208]

चतुर्विधमिदं वाद्यं वादित्रातोद्यनामकम् ।
मृदङ्गा मुरजा भेदास्त्वङ्क्यालिङ्ग्योर्ध्वकास्त्रयः ।। [209]

स्याद्यशःपटहो ढक्का भेरी स्त्री दुन्दुभिः पुमान्।
आनकः पटहोऽस्त्री स्यात्कोणो वीणादि वादनम् ।। [210]

वीणादण्डः प्रवालः स्यात्ककुभस्तु प्रसेवकः ।
कोलम्बकस्तु कायोऽस्या उपनाहो निबन्धनम् ।। [211]

वाद्यप्रभेदा डमरुमड्डुडिण्डिमझर्झराः ।
मर्दलः पणवोऽन्ये च नर्तकीलासिके समे ।। [212]

विलम्बितं द्रुतं मध्यं तत्त्वमोघो घनं क्रमात्।

तालः कालक्रियामानं लयः साम्यममथास्त्रियाम् ।। [213]

ताण्डवं नटनं नाट्यं लास्यं नृत्यं च नर्तने ।
तौर्यत्रिकं नृत्यगीतवाद्यं नाट्यमिदं त्रयम् ।। [214]

भ्रकुंसश्च भ्रुकुंसश्च भ्रूकुंसश्चेति नर्तकः ।
स्त्रीवेषधारी पुरुषो नाट्योक्तौ गणिकाज्जुका ।। [215]

भगिनीपतिरावुत्तो भावो विद्वानथावुकः ।
जनको युवराजस्तु कुमारो भर्तृदारकः ।। [216]

राजा भट्टारको देवस्तत्सुता भर्तृदारिका ।
देवी कृताभिषेकायामितरासु तु भट्टिनी ।। [217]

अब्रह्मण्यमवधोक्तौ राजश्यालस्तु राष्ट्रियः ।
अम्बा माताथ बाला स्याद्वासूरार्यस्तु मारिषः ।। [218]

अत्तिका भगिनी ज्येष्ठा निष्ठा निर्वहणे समे ।

PUBLISHED by **aarsha, jaipur : aarshaayurveda@gmail.com**

www.ayurvedah.in

हण्डे हञ्जे हलाह्वाने नीचां चेटीं सखीं प्रति ।। [219]

अङ्गहारोऽङ्गविक्षेपो व्यञ्जकाभिनयौ समौ ।
निर्वृत्ते त्वङ्गसत्त्वाभ्यां द्वे त्रिष्वाङ्गिकसात्त्विके ।। [220]

श्रृंगारवीरकरुणाद्भुतहास्यभयानकाः ।
बीभत्सरौद्रौ च रसाः श्रृंगारः शुचिरुज्ज्वलः । [221]

उत्साहवर्धनो वीरः कारुण्यं करुणा घृणा ।
कृपा दयाऽनुकम्पा स्यादनुक्रोशोऽप्यथो हसः । [222]

हासो हास्यं च बीभत्सं विकृतं त्रिष्विदं द्वयम् ।
विस्मयोऽद्भुतमाश्चर्यं चित्रमऽप्यथ भैरवम् । [223]

दारुणं भीषणं भीष्मं घोरं भीमं भयानकम् ।
भयंकरं प्रतिभयं रौद्रं तूग्रममी त्रिषु । [224]

चतुर्दश दरस्त्रासो भीतिर्भीः साध्वसं भयम् ।
विकारो मानसो भावोऽनुभावो भावबोधकः ।। [225]

गर्वोऽभिमानोऽहंकारो मानश्चित्तसमुन्नतिः ।
दर्पोऽवलोकोऽवष्टम्भश्चित्तोद्रेकः स्मयो मदः ।। [226]

अनादरः परिभवः परीभावस्तिरस्क्रिया ।
रीढावमाननावज्ञावहेलनमसूर्क्षणम् ।। [227]

मन्दाक्षं ह्रीस्त्रपा व्रीडा लज्जा सापत्रपान्यतः ।
क्षान्तिस्तितिक्षाभिध्या तु परस्य विषये स्पृहा ।। [228]

अक्षान्तिरीर्ष्यासूया तु दोषारोपो गुणेष्वपि ।
वैरं विरोधो विद्वेषो मन्युशोकौ तु शुक्स्त्रियाम् ।। [229]

पश्चात्तापोऽनुतापश्च विप्रतीसार इत्यपि ।
कोपक्रोधामर्षरोषप्रतिघा रुड्क्रुधौ स्त्रियौ ।। [230]



www.ayurvedah.in

शुचौ तु चरिते शीलमुन्मादश्चित्तविभ्रमः ।
प्रेमा प्रियता हार्दं प्रेमस्नेहोऽथ दोहदम् ।। [231]

इच्छा काङ्क्षा स्पृहेहा तृड् वाञ्छा लिप्सा मनोरथः ।
कामोऽभिलाषस्तर्षश्च सोऽत्यर्थं लालसा द्वयोः ।। [232]

उपाधिर्ना धर्मचिन्ता पुंस्याधिर्मानसी व्यथा ।
स्याच्चिन्ता स्मृतिराध्यानमुत्कण्ठोत्कलिके समे ।। [233]

उत्साहोऽध्यवसायः स्यात्स वीर्यमतिशक्तिभाक् ।
कपटोऽस्त्री व्याजदम्भोपधयश्छद्मकैतवे ।। [234]

कुसृतिर्निकृतिः शाठ्यं प्रमादोऽनवधानता ।
कौतूहलं कौतुकं च कुतुकं च कुतूहलम् ।। [235]

स्त्रीणां विलासबिब्बोकविभ्रमा ललितं तथा ।
हेला लीलेत्यमी हावाःक्रियाः शृङ्गारभावजाः ।। [236]

द्रवकेलिपरीहासाः क्रीडा लीला च नर्म च ।
व्याजोऽपदेशो लक्ष्यं च क्रीडा खेला च कूर्दनम् ।। [237]

घर्मो निदाघः स्वेदः स्यात्प्रलयो नष्टचेष्टता ।
अवहित्थाकारगुप्तिः समौ संवेगसम्भ्रमौ ।। [238]

स्यादाच्छुरितकं हासः सोत्प्रासः स मनाक्स्मितम् ।
मध्यमः स्याद्विहसितं रोमाञ्चो रोमहर्षणम् ।। [239]

क्रन्दितं रुदितं क्रुष्टं जृम्भस्तु त्रिषु जृम्भणम् ।
विप्रलम्भो विसंवादो रिङ्गणं स्खलनं समे ।। [240]

स्यान्निद्रा शयनं स्वापः स्वप्नः संवेश इत्यपि ।
तन्द्री प्रमीला भ्रकुटिर्भ्रुकुटिर्भ्रूकुटिः स्त्रियाम् ।। [241]

अदृष्टिः स्यादसौम्येऽक्षिण संसिद्धिप्रकृती त्विमे ।
स्वरूपं च स्वभावश्च निसर्गश्चाथ वेपथुः ।। [242]



www.ayurvedah.in

कम्पोऽथ क्षण उद्धर्षो मह उद्धव उत्सवः ।

## अथ पातालभोगिवर्गः

अधोभुवनपातालं बलिसद्म रसातलम् ।। [243]

नागलोकोऽथ कुहरं सुषिरं विवरं बिलम् ।
छिद्रं निर्व्यथनं रोकं रन्ध्रं श्वभ्रं वपा सुषिः ।। [244]

गर्तावटौ भुवि श्वभ्रे सरन्ध्रे सुषिरं त्रिषु ।
अन्धकारोऽस्त्रियां ध्वान्तं तमिस्रं तिमिरं तमः ।। [245]

ध्वान्ते गाढेऽन्धतमसं क्षीणेऽवतमसं तमः ।
विष्वक्संतमसं नागाः काद्रवेयास्तदीश्वरे ।। [246]

शेषोऽनन्तो वासुकिस्तु सर्पराजोऽथ गोनसे ।
तिलित्सः स्यादजगरे शयुर्वाहस इत्युभौ ।। [247]

अलगर्दो जलव्यालः समौ राजिलडुण्डुभौ ।
मालुधानो मातुलाहिर्निर्मुक्तो मुक्तकञ्चुकः ।। [248]

सर्पः पृदाकुर्भुजगो भुजंगोऽहिर्भुजंगमः ।
आशीविषो विषधरश्चक्री व्यालः सरीसृपः ।। [249]

कुण्डली गूढपाच् चक्षुःश्रवाः काकोदरः फणी ।
दर्वीकरो दीर्घपृष्ठो दन्दशूको बिलेशयः ।। [250]

उरगः पन्नगो भोगी जिह्मगः पवनाशनः ।
लेलिहानो द्विरसनो गोकर्णः कञ्चुकी तथा ।। [251]

कुम्भीनसः फणधरो हरिर्भोगधरस्तथा ।
अहेः शरीरं भोगः स्याद् आशीरप्यहिदंष्ट्रिका ।। [252]

त्रिष्वाहेयं विषास्थ्यादि स्फटायां तु फणा द्वयोः ।
समौ कञ्चुकनिर्मोकौ क्ष्वेडस्तु गरलं विषम् ।। [253]

पुंसि क्लीबे च काकोलकालकूटहलाहलाः ।
सौराष्ट्रिकः शौल्किकेयो ब्रह्मपुत्रः प्रदीपनः ।। [254]

दारदो वत्सनाभश्च विषभेदा अमी नव ।
विषवैद्यो जाङ्गुलिको व्यालग्राह्यहितुण्डिकः ।। [255]

## अथ नरकवर्गः

स्यान्नारकस्तु नरको निरयो दुर्गतिः स्त्रियाम् ।
तद्भेदास्तपनावीचिमहारौरवरौरवाः ।। [256]

संघातः कालसूत्रं चेत्याद्याः सत्त्वास्तु नारकाः ।
प्रेता वैतरणी सिन्धुः स्यादलक्ष्मीस्तु निर्ऋतिः ।। [257]

विष्टिराजूः कारणा तु यातना तीव्रवेदना ।
पीडा बाधा व्यथा दुःखमामनस्यं प्रसूतिजम् ।। [258]
स्यात्कष्टं कृच्छ्रमाभीलं त्रिष्वेषां भेद्यगामि यत्।

# अथ वारिवर्गः

समुद्रोऽब्धिरकूपारः पारावारः सरित्पतिः ।। [259]

उदन्वानुदधिः सिन्धुः सरस्वान्सागरोऽर्णवः ।
रत्नाकरो जलनिधिर्यादःपतिरपाम्पतिः ।। [260]

तस्य प्रभेदाः क्षीरोदो लवणोदस्तथापरे ।
आपः स्त्री भूम्नि वार्वारि सलिलं कमलं जलम् ।। [261]

पयः कीलालममृतं जीवनं भुवनं वनम् ।
कबन्धमुदकं पाथः पुष्करं सर्वतोमुखम् ।। [262]

अम्भोर्णस्तोयपानीयनीरक्षीरोऽम्बुशम्बरम् ।
मेघपुष्पं घनरसस्त्रिषु द्वे अम्मयम् ।। [263]

PUBLISHED by **aarsha, jaipur : aarshaayurveda@gmail.com**

www.ayurvedah.in

भङ्गस्तरंग ऊर्मिर्वा स्त्रियां वीचिरथोर्मिषु ।
महत्सूल्लोलकल्लोलौ स्यादावर्तोऽम्भसां भ्रमः ।। [264]

पृषन्ति बिन्दुपृषताः पुमांसो विप्रुषः स्त्रियाम् ।
चक्राणि पुटभेदाः स्युर्भ्रमाश्च जलनिर्गमाः ।। [265]

कूलं रोधश्च तीरं च प्रतीरं च तटं त्रिषु ।
पारावारे परार्वाची तीरे पात्रं तदन्तरम् ।। [266]

द्वीपोऽस्त्रियामन्तरीपं यदन्तर्वारिणस्तटम् ।
तोयोत्थितं तत्पुलिनं सैकतं सिकतामयम् ।। [267]

निषद्वरस्तु जम्बालः पङ्कोऽस्त्री शादकर्दमौ ।
जलोच्छ्वासाः परीवाहाः कूपकास्तु विदारकाः ।। [268]

नाव्यं त्रिलिङ्गं नौतार्ये स्त्रियां नौस्तरणिस्तरिः ।
उडुपं तु प्लवः कोलः स्रोतोऽम्बुसरणं स्वतः ।। [269]

आतरस्तरपण्यं स्याद् द्रोणी काष्ठाम्बुवाहिनी ।
सांयात्रिकः पोतवणिक्कर्णधारस्तु नाविकः ।। [270]

नियामकाः पोतवाहाः कूपको गुणवृक्षकः ।
नौकादण्डः क्षेपणी स्यादरित्रं केनिपातकः ।। [271]

अभ्रिः स्त्री काष्ठकुद्दालः सेकपात्रं तु सेचनम् ।
क्लीबेऽर्धनावं नावोऽर्धेऽतीतनौकेऽतिनु त्रिषु ।। [272]

त्रिष्वागाधात्प्रसन्नोऽच्छः कलुषोऽनच्छ आविलः ।
निम्नं गभीरं गम्भीरमुत्तानं तद्विपर्यये ।। [273]

अगाधमतलस्पर्शे कैवर्ते दाशधीवरौ ।
आनायः पुंसि जालं स्याच्छणसूत्रं पवित्रकम् ।। [274]

मत्स्याधानी कुवेणी स्याद्बडिशं मत्स्यवेधनम् ।
पृथुरोमा झषो मत्स्यो मीनो वैसारिणोऽण्डजः ।। [275]



www.ayurvedahi.in

विसारः शकुली चाथ गडकः शकुलार्भकः ।
सहस्रदंष्ट्रः पाठीन उलूपी शिशुकः समौ ।। [276]

नलमीनश्चिलिचिमः प्रोष्ठी तु शफरी द्वयोः ।
क्षुद्राण्डमत्स्यसंघातः पोताधानमथो झषाः ।। [277]

रोहितो मद्गुरः शालो राजीवः शकुलस्तिमिः ।
तिमिङ्गिलादयश्चाथ यादांसि जलजन्तवः ।। [278]

तद्भेदाः शिशुमारोद्रशङ्कवो मकरादयः ।
स्यात्कुलीरः कर्कटकः कूर्मे कमठकच्छपौ ।। [279]

ग्राहोऽवहारो नक्रस्तु कुम्भीरोऽथ महीलता ।
गण्डूपदः किञ्चुलको निहाका गोधिका समे ।। [280]

रक्तपा तु जलौकायां स्त्रियां भूम्नि जलौकसः ।
मुक्तास्फोटः स्त्रियां शुक्तिः शङ्खः स्यात्कम्बुरस्त्रियौ ।। [281]

क्षुद्रशङ्खाः शङ्खनखाः शम्बूका जलशुक्तयः ।
भेके मण्डूकवर्षाभूशालूरप्लवदर्दुराः ।। [282]

शिली गण्डूपदी भेकी वर्षाभ्वी कमठी डुलिः ।
मद्गुरस्य प्रिया श्रृङ्गी दुर्नामा दीर्घकोशिका ।। [283]

जलाशया जलाधारास्तत्रागाधजलो ह्रदः ।
आहावस्तु निपानं स्यादुपकूपजलाशये ।। [284]

पुंस्येवान्धुः प्रहिः कूप उदपानं तु पुंसि वा ।
नेमिस्त्रिकास्य वीनाहो मुखबन्धनमस्य यत्।। [285]

पुष्करिण्यां तु खातं स्यादखातं देवखातकम् ।
तडागोऽस्त्री कासारः सरसी सरः ।। [286]

वेशन्तः पल्वलं चाल्पसरो वापी तु दीर्घिका ।
खेयं तु परिखाधारस्त्वम्भसां यत्र धारणम् ।। [287]



www.ayurvedah.in

स्यादालवालमावालमावापोऽथ नदी सरित्।
तरंगिणी शैवलिनी तटिनी ह्रादिनी धुनी ।। [288]

स्रोतस्विनी द्वीपवती स्रवन्ती निम्नगापगा ।
कूलङ्कषा निर्झरिणी रोधोवक्रा सरस्वती ।। [289]

गङ्गा विष्णुपदी जह्नुतनया सुरनिम्नगा ।
भागीरथी त्रिपथगा त्रिस्रोता भीष्मसूरपि ।। [290]

कालिन्दी सूर्यतनया यमुना शमनस्वसा ।
रेवा तु नर्मदा सोमोद्भवा मेकलकन्यका ।। [291]

करतोया सदानीरा बाहुदा सैतवाहिनी ।
शतद्रुस्तु शुतुद्रिः स्याद्विपाशा तु विपाट् स्त्रियाम् ।। [292]

शोणो हिरण्यवाहः स्यात्कुल्याल्पा कृत्रिमा सरित्।
शरावती वेत्रवती चन्द्रभागा सरस्वती ।। [293]

काबेरी सरितोऽन्याश्च सम्भेदः सिन्धुसंगमः ।
द्वयोः प्रणाली पयसः पदव्यां त्रिषु तूत्तरौ ।। [294]

देविकायां सरय्वां च भवे दाविकसारवौ ।
सौगन्धिकं तु कल्हारं हल्लकं रक्तसंध्यकम् ।। [295]

स्यादुत्पलं कुवलयमथ नीलाम्बुजन्म च ।
इन्दीवरं च नीलेऽस्मिन्सिते कुमुदकैरवे ।। [296]

शालूकमेषां कन्दः स्याद्वारिपर्णी तु कुम्भिका ।
जलनीली तु शैवालं शैवलोऽथ कुमुद्वती ।। [297]

कुमुदिन्यां नलिन्यां तु बिसिनीपद्मिनीमुखाः ।
वा पुंसि पद्मं नलिनमरविन्दं महोत्पलम् ।। [298]

सहस्रपत्त्रं कमलं शतपत्त्रं कुशेशयम् ।
पङ्केरुहं तामरसं सारसं सरसीरुहम् ।। [299]



www.ayurvedah.in

बिसप्रसूनराजीवपुष्कराम्भोरुहाणि च ।
पुण्डरीकं सिताम्भोजमथ रक्तसरोरुहे ।। [300]

रक्तोत्पलं कोकनदं नालो नालमथास्त्रियाम् ।
मृणालं बिसमब्जादिकदम्बे खण्डमस्त्रियाम् ।। [301]

करहाटः शिफाकन्दः किञ्जल्कः केसरोऽस्त्रियाम् ।
संवर्तिका नवदलं बीजकोशो वराटकः ।। [302]

उक्तं स्वर्व्योमदिक्कालधीशब्दादि सनाट्यकम् ।
पातालभोगिनरकं वारि चैषां च संगतम् ।। [303]

इत्यमरसिंहकृतौ नामलिङ्गानुशासने ।
स्वरादिकाण्डः प्रथमः साङ्ग एव समर्थितः ।। [304]

# अथ द्वितीयकाण्डम्

वर्गाः पृथ्वीपुरक्ष्माभृद्वनौषधिमृगादिभिः ।
नृब्रह्मक्षत्रविड्शूद्रैः साङ्गोपाङ्गैरिहोदिताः ।। [1]

# अथ भूमिवर्गः

भूर्भूमिरचलानन्ता रसा विश्वम्भरा स्थिता ।
धरा धरित्री धरणिः क्षोणिर्ज्या काश्यपी क्षितिः ।। [2]

सर्वंसहा वसुमती वसुधोर्वी वसुंधरा ।
गोत्रा कुः पृथिवी पृथ्वी क्ष्मावनिर्मेदिनी मही ।। [3]

विपुला गह्वरी धात्री गौरिला कुम्भिनी क्षमा ।
भूतधात्री रत्नगर्भा जगती सागराम्बरा ।। [4]



www.ayurvedah.in

मृन्मृत्तिका प्रशस्ता तु मृत्सा मृत्स्ना च मृत्तिका ।
उर्वरा सर्वसस्याढ्या स्यादूषः क्षारमृत्तिका ।। [5]

ऊषवानूषरो द्वावप्यन्यलिङ्गौ स्थलं स्थली ।
समानौ मरुधन्वानौ द्वे खिलाप्रहते समे ।। [6]

त्रिष्वथो जगती लोको विष्टपं भुवनं जगत्।
लोकोऽयं भारतं वर्षं शरावत्यास्तु योऽवधेः ।। [7]

देशः प्राग्दक्षिणः प्राच्य उदीच्यः पश्चिमोत्तरः ।
प्रत्यन्तो म्लेच्छदेशः स्यान्मध्यदेशस्तु मध्यमः ।। [8]

आर्यावर्तः पुण्यभूमिर्मध्यं विन्ध्यहिमालयोः ।
नीवृज्जनपदो देशविषयौ तूपवर्तनम् ।। [9]

त्रिष्वागोष्ठान्नडप्राये नड्वान्नड्वल इत्यपि ।
कुमुद्वान्कुमुदप्राये वेतस्वान्बहुवेतसे ।। [10]

शाद्वलः शादहरिते सजम्बाले तु पङ्किलः ।
जलप्रायमनूपं स्यात्पुंसि कच्छस्तथाविधः ।। [11]

स्त्री शर्करा शर्करिलः शार्करः शर्करावति ।
देश एवादिमावेववमुन्नेयाः सिकतावति ।। [12]

देशो नद्यम्बुवृष्ट्यम्बुसम्पन्नव्रीहिपालितः ।
स्यान्नदीमातृको देवमातृकश्च यथाक्रमम् ।। [13]

सुराज्ञि देशे राजन्वान्स्यात्ततोऽन्यत्र राजवान्।
गोष्ठं गोस्थानकं तत्तु गौष्ठीनं भूतपूर्वकम् ।। [14]

पर्यन्तभूः परिसरः सेतुरालौ स्त्रियां पुमान्।
वामलूरश्च नाकुश्च वल्मीकं पुंनपुंसकम् ।। [15]

अयनं वर्त्म मार्गाध्वपन्थानः पदवी सृतिः ।
सरणिः पद्धतिः पद्या वर्तन्येकपदीति च ।। [16]



www.ayurvedah.in

सुपन्थाश्च सत्पथश्चार्चितेऽध्वनि ।
व्यध्वो दुरध्वो विपथः कदध्वा कापथः समाः ।। [17]

अपन्थास्त्वपथं तुल्ये शृङ्गाटकचतुष्पथे ।
प्रान्तरं दूरशून्योऽध्वा कान्तारं वर्त्म दुर्गमम् ।। [18]

गव्यूतिः स्त्री क्रोशयुगं नल्वः किष्कुचतुःशतम् ।
घण्टापथः संसरणं तत्पुरस्योपनिष्करम् ।। [19]

द्यावापृथिव्यौ रोदस्यौ द्यावाभूमी च रोदसी ।
दिवस्पृथिव्यौ गञ्जा तु रुमा स्याल्लवणाकरः ।। [20]

## अथ पुरवर्गः

पूः स्त्री पुरीनगर्यौ वा पत्तनं पुटभेदनम् ।
स्थानीयं निगमोऽन्यत्तु यन्मूलनगरात्पुरम् ।। [21]

तच्छाखानगरं वेशो वेश्याजनसमाश्रयः ।
आपणस्तु निषद्यायां विपणिः पण्यवीथिका ।। [22]

रथ्या प्रतोली विशिखा स्याच्चयो वप्रमस्त्रियाम् ।
प्राकारो वरणः सालः प्राचीनं प्रातन्तो वृतिः ।। [23]

भित्तिः स्त्री कुड्यमेडूकं यदन्तर्न्यस्तकीकसम् ।
गृहं गेहोद्वसितं वेश्म सद्म निकेतनम् ।। [24]

निशान्तं पस्त्यसदनं भवनागारमन्दिरम् ।
गृहाः पुंसि च भूम्न्येव निकाय्यनिलयालयाः ।। [25]

वासः कुटी द्वयोः शाला सभा संजवनं त्विदम् ।
चतुःशालं मुनीनां तु पर्णशालोटजोऽस्त्रियाम् ।। [26]

चैत्यमायतनं तुल्ये वाजिशाला तु मन्दुरा ।
आवेशनं शिल्पिशाला प्रपा पानीयशालिका ।। [27]

मठश्छात्रादिनिलयो गञ्जा तु मदिरागृहम् ।
गर्भागारं वासगृहमरिष्टं सूतिकागृहम् ।। [28]

कुट्टिमोऽस्त्री निबद्धा भूश्चन्द्रशाला शिरोगृहम् ।
वातायनं गवाक्षोऽथ मण्डपोऽस्त्री जनाश्रयः ।। [29]

हर्म्यादि धनिनां वासः प्रासादो देवभूभुजाम् ।
सौधोऽस्त्री राजसदनमुपकार्योपकारिका ।। [30]

स्वस्तिकः सर्वतोभद्रो नन्द्यावर्तादयोऽपि च ।
विच्छन्दकः प्रभेदा हि भवन्तीश्वरसद्मनाम् ।। [31]

स्त्र्यगारं भूभुजामन्तःपुरं स्यादवरोधनम् ।
शुद्धान्तश्चावरोधश्च स्यादट्टः क्षौममस्त्रियाम् ।। [32]

प्रघाणप्रघणालिन्दा बहिर्द्वारप्रकोष्ठके ।
गृहावग्रहणी देहल्यङ्गणं चत्वराजिरे ।। [33]

अधस्ताद्दारुणि शिला नासा दारुपरि स्थितम् ।
प्रच्छन्नमन्तर्द्वारं स्यात्पक्षद्वारं तु पक्षकम् ।। [34]

वलीकनीध्रे पटलप्रान्तेऽथ पटलं छदिः ।
गोपानसी तु वलभी छादने वक्रदारुणि ।। [35]

कपोतपालिकायां तु विटङ्कं पुंनपुंसकम् ।
स्त्री द्वार्द्वारं प्रतीहारः स्याद्वितर्दिस्तु वेदिका ।। [36]

तोरणोऽस्त्री बहिर्द्वारं पुरद्वारं तु गोपुरम् ।
कूटं पूर्द्वारि यद्धस्तिनखस्तस्मिन्नथ त्रिषु ।। [37]

कपाटमररं तुल्ये तद्विष्कम्भोऽर्गलं न ना ।
आरोहणं स्यात्सोपानं निश्रेणिस्त्वधिरोहिणी ।। [38]

सम्मार्जनी शोधनी स्यात्संकरोऽवकरस्तथा ।
क्षिप्ते मुखं निःसरणं संनिवेशो निकर्षणम् ।। [39]

समौ संवसथग्रामौ वेश्मभूर्वास्तुरस्त्रियाम् ।
ग्रामान्त उपशल्यं स्यात्सीमसीमे स्त्रियामुभे ।। [40]

घोष आभीरपल्ली स्यात् पक्कणः शबरालयः ।

## अथ शैलवर्गः

महीध्रे शिखरिक्ष्माभृदहार्यधरपर्वताः ।। [41]

अद्रिगोत्रगिरिग्रावाचलशैलशिलोच्चयाः ।
लोकालोकश्चक्रवालस्त्रिकूटस्त्रिककुत्समौ ।। [42]

अस्तस्तु चरमक्ष्माभृदुदयः पूर्वपर्वतः ।
हिमवान्निषधो विन्ध्यो माल्यवान्पारियात्रिकः ।। [43]

गन्धमादनमन्ये च हेमकूटादयो नगाः ।
पाषाणप्रस्तरग्रावोपलाश्मानः शिला दृषत्।। [44]

कूटोऽस्त्री शिखरं शृङ्गं प्रपातस्त्वतटो भृगुः ।
कटकोऽस्त्री नितम्बोऽद्रेः स्नुः प्रस्थः सानुरस्त्रियाम् ।। [45]

उत्सः प्रस्रवणं वारिप्रवाहो निर्झरो झरः ।
दरी तु कन्दरो वा स्त्री देवखातबिले गुहा ।। [46]

गह्वरं गण्डशैलास्तु च्युताः स्थूलोपला गिरेः ।
दन्तकास्तु बहिस्तिर्यक्प्रदेशान्निर्गता गिरेः ।। [47]

खनिः स्त्रियामाकरः स्यात्पादाः प्रत्यन्तपर्वताः ।
उपत्यकाद्रेरासन्ना भूमिरूर्ध्वमधित्यका ।। [48]

धातुर्मनःशिलाद्यद्रेर्गैरिकं तु विशेषतः ।
निकुञ्जकुञ्जौ वा क्लीबे लतादिपिहितोदरे ।। [49]



www.ayurvedahi.in

## अथ वनौषधिवर्गः

अटव्यरण्यं विपिनं गहनं काननं वनम् ।
महारण्यमरण्यानी गृहारामास्तु निष्कुटाः ।। [50]

आरामः स्यादुपवनं कृत्रिमं वनमेव यत्।
अमात्यगणिकागेहोपवने वृक्षवाटिका ।। [51]

पुमानाक्रीड उद्यानं राज्ञः साधारणं वनम् ।
स्यादेतदेव प्रमदवनमन्तःपुरोचितम् ।। [52]

वीथ्यालिरावलिः पङ्क्तिः श्रेणी लेखास्तु राजयः ।
वन्या वनसमूहे स्यादङ्कुरोऽभिनवोद्भिदि ।। [53]

वृक्षो महीरुहः शाखी विटपी पादपस्तरुः ।
अनोकहः कुटः शालः पलाशी द्रुद्रुमागमाः ।। [54]

वानस्पत्यः फलैः पुष्पात्तैरपुष्पाद्वनस्पतिः ।

ओषध्यः फलपाकान्ताः स्युरवन्ध्यः फलेग्रहिः ।। [55]

वन्ध्योऽफलोऽवकेशी च फलवान्फलिनः फली ।

प्रफुल्लोत्फुल्लसम्फुल्लव्याकोशविकचस्फुटाः ।। [56]

फुल्लश्चैते विकसिते स्युरवन्ध्यादयस्त्रिषु ।

स्थाणुर्वा ना ध्रुवः शङ्कुर्हरस्वशाखाशिफः क्षुपः ।। [57]

अप्रकाण्डे स्तम्बगुल्मौ वल्ली तु व्रततिर्लता ।

लता प्रतानिनी वीरुद्गुल्मिन्युलप इत्यपि ।। [58]

नगाद्यारोह उच्छ्राय उत्सेधश्चोच्छ्रयश्च सः ।

अस्त्री प्रकाण्डः स्कन्धः स्यान्मूलाच्छाखावधिस्तरोः ।। [59]

समे शाखालते स्कन्धशाखाशाले शिफाजटे ।

शाखाशिफावरोहः स्यान्मूलाच्चाग्रं गता लता ।। [60]



www.ayurvedah.in

शिरोऽग्रं शिखरं वा ना मूलं बुध्नोऽङ्घ्रिनामकः ।
सारो मज्जा नरि त्वक्स्त्री वल्कं वल्कलमस्त्रियाम् ।। [61]

काष्ठं दार्विन्धनं त्वेध इध्ममेधः समित्स्त्रियाम् ।
निष्कुहः कोटरं वा ना वल्लरिर्मञ्जरिः स्त्रियौ ।। [62]

पत्त्रं पलाशं छदनं दलं पर्णं छदः पुमान्।
पल्लवोऽस्त्री किसलयं विस्तारो विटपोऽस्त्रियाम् ।। [63]

वृक्षादीनां फलं सस्यं वृन्तं प्रसवबन्धनम् ।
आमे फले शलाटुः स्याच्छुष्के वानमुभे त्रिषु ।। [64]

क्षारको जालकं क्लीबे कलिका कोरकः पुमान्।
स्याद्गुच्छकस्तु स्तबकः कुड्मलो मुकुलोऽस्त्रियाम् ।। [65]

स्त्रियः सुमनसः पुष्पं प्रसूनं कुसुमं सुमम् ।
मकरन्दः पुष्परसः परागः सुमनोरजः ।। [66]

द्विहीनं प्रसवे सर्वं हरीतक्यादयः स्त्रियाम् ।
आश्वत्थवैणवप्लाक्षनैयग्रोधैङ्गुदम् फले ।। [67]

बार्हतं च फले जम्ब्वा जम्बूः स्त्री जम्बु जाम्बवम् ।
पुष्पे जातीप्रभृतयः स्वलिङ्गाः व्रीहयः फले ।। [68]

विदार्याद्यास्तु मूलेऽपि पुष्पे क्लीबेऽपि पाटला ।
बोधिद्रुमश्चलदलः पिप्पलः कुञ्जराशनः ।। [69]

अश्वत्थेऽथ कपित्थे स्युर्दधित्थग्राहिमन्मथाः ।
तस्मिन्दधिफलः पुष्पफलदन्तशठावपि ।। [70]

उदुम्बरो जन्तुफलो यज्ञाङ्गो हेमदुग्धकः ।
कोविदारे चमरिकः कुद्दालो युगपत्त्रकः ।। [71]

सप्तपर्णो विशालत्वक्शारदो विषमच्छदः ।
आरग्वधे राजवृक्षशम्पाकचतुरङ्गुलाः ।। [72]

PUBLISHED by **aarsha, jaipur : aarshaayurveda@gmail.com**

आरेवतव्याधिघातकृतमालसुवर्णकाः ।
स्युर्जम्बीरे दन्तशठजम्भजम्भीरजम्भलाः ।। [73]

वरुणो वरणः सेतुस्तिक्तशाकः कुमारकः ।
पुंनागे पुरुषस्तुङ्गः केसरो देववल्लभः ।। [74]

पारिभद्रे निम्बतरुर्मन्दारः पारिजातकः ।
तिनिशे स्यन्दनो नेमी रथद्रुरतिमुक्तकः ।। [75]

वञ्जुलश्चित्रकृच्चाथ द्वौ पीतनकपीतनौ ।
आम्रातके मधूके तु गुडपुष्पमधुद्रुमौ ।। [76]

वानप्रस्थमधुष्ठीलौ जलजेऽत्र मधूलकः ।
पीलौ गुडफलः स्रंसी तस्मिंस्तु गिरिसम्भवे ।। [77]

अक्षोटकन्दरालौ द्वावङ्कोटे तु निकोचकः ।
पलाशे किंशुकः पर्णो वातपोतोऽथ वेतसे ।। [78]

रथाभ्रपुष्पविदुरशीतवानीरवञ्जुलाः ।
द्वौ परिव्याधविदुलौ नादेयी चाम्बुवेतसे ।। [79]

शोभाञ्जने शिग्रुतीक्ष्णगन्धकाक्षीवमोचकाः ।
रक्तोऽसौ मधुशिग्रुः स्यादरिष्टः फेनिलः समौ ।। [80]

बिल्वे शाण्डिल्यशैलूषौ मालूरश्रीफलावपि ।
प्लक्षो जटी पर्कटी स्यान्न्यग्रोधो बहुपाद्वटः ।। [81]

गालवः शाबरो लोध्रस्तिरीटस्तिल्वमार्जनौ ।
आम्रश्चूतो रसालोऽसौ सहकारोऽतिसौरभः ।। [82]

कुम्भोलूखलकं क्लीबे कौशिको गुग्गुलूः पुरः ।
शेलूः श्लेष्मातकः शीत उद्दालो बहुवारकः ।। [83]

राजादनं प्रियालः स्यात्सन्नकद्रुर्धनुःपटः ।
गम्भारी सर्वतोभद्रा काश्मरी मधुपर्णिका ।। [84]



www.ayurvedah.in

श्रीपर्णी भद्रपर्णी च काश्मर्यश्चाप्यथ द्वयोः ।
कर्कन्धूर्बदरी कोलिः कोलं कुवलफेनिले ।। [85]

सौवीरं बदरं घोण्टाप्यथ स्यात्स्वादुकण्टकः ।
विकङ्कतः सुवावृक्षो ग्रन्थिलो व्याघ्रपादपि ।। [86]

ऐरावतो नागरङ्गो नादेयी भूमिजम्बुका ।
तिन्दुकः स्फूर्जकः कालस्कन्धश्च शितिसारके ।। [87]

काकेन्दुः कुलकः काकतिन्दुकः काकपीलुके ।
गोलीढो झाटलो घण्टापाटलिर्मोक्षमुष्ककौ ।। [88]

तिलकः क्षुरकः श्रीमान्समौ पिचुलझावुकौ ।
श्रीपर्णिका कुमुदिका कुम्भी कैटर्यकट्फलौ ।। [89]

क्रमुकः पट्टिकाख्यः स्यात्पट्टी लाक्षाप्रसादनः ।
तूदस्तु यूपः क्रमुको ब्रह्मण्यो ब्रह्मदारु च ।। [90]

तूलं च नीपप्रियककदम्बास्तु हरिप्रियः ।
वीरवृक्षोऽरुष्करोऽग्निमुखी भल्लातकी त्रिषु ।। [91]

गर्दभाण्डे कन्दरालकपीतनसुपार्श्वकाः ।
प्लक्षश्च तिन्तिडी चिञ्चाम्लिकाथो पीतसारके ।। [92]

सर्जकासनबन्धूकपुष्पप्रियकजीवकाः ।
साले तु सर्जकार्श्याश्वकर्णकाः सस्यसंवरः ।। [93]

नदीसर्जो वीरतरुरिन्द्रद्रुः ककुभोऽर्जुनः ।
राजादनः फलाध्यक्षः क्षीरिकायामथ द्वयोः ।। [94]

इङ्गुदी तापसतरुर्भूर्जे चर्मिमृदुत्वचौ ।
पिच्छिला पूरणी मोचा स्थिरायुः शाल्मलिर्द्वयोः ।। [95]

पिच्छा तु शाल्मलीवेष्टे रोचनः कूटशाल्मलिः ।
चिरबिल्वो नक्तमालः करजश्च करञ्जके ।। [96]

www.ayurvedahi.in

प्रकीर्यः पूतिकरजः पूतिकः कलिमारकः ।
करञ्जभेदाः षड्ग्रन्थो मर्कट्यङ्गारवल्लरी ।। [97]

रोही रोहितकः प्लीहशत्रुर्दाडिमपुष्पकः ।
गायत्री बालतनयः खदिरो दन्तधावनः ।। [98]

अरिमेदो विट्खदिरे कदरः खदिरे सिते ।
सोमवल्कोऽप्यथ व्याघ्रपुच्छगन्धर्वहस्तकौ ।। [99]

एरण्ड उरुवूकश्च रुचकश्चित्रकश्च सः ।
चञ्चुः पञ्चाङ्गुलो मण्डवर्धमानव्यडम्बकाः ।। [100]

अल्पा शमी शमीरः स्याच्छमी सक्तुफला शिवा ।
पिण्डीतको मरुवकः श्वसनः करहाटकः ।। [101]

शल्यश्च मदने शक्रपादपः पारिभद्रकः ।
भद्रदारु द्रुकिलिमं पीतदारु च दारु च ।। [102]

पूतिकाष्ठं च सप्त स्युर्देवदारुण्यथ द्वयोः ।

पाटलिः पाटलामोघा काचस्थाली फलेरुहा ।। [103]

कृष्णवृन्ता कुबेराक्षी श्यामा तु महिलाह्वया ।

लता गोवन्दनी गुन्द्रा प्रियङ्गुः फलिनी फली ।। [104]

विष्वक्सेना गन्धफली कारम्भा प्रियकश्च सा ।

मण्डूकपर्णपत्त्रोर्णनटकट्वङ्गटुण्टुकाः ।। [105]

स्योनाकशुकनासर्क्षदीर्घवृन्तकुटन्नटाः ।

अमृता च वयःस्था च त्रिलिङ्गस्तु विभीतकः ।। [106]

नाक्षस्तुषः कर्षफलो भूतावासः कलिद्रुमः ।

अभया त्वव्यथा पथ्या कायस्था पूतनामृता ।। [107]

हरीतकी हैमवती चेतकी श्रेयसी शिवा ।

पीतद्रुः सरलः पूतिकाष्ठं चाथ द्रुमोत्पलः ।। [108]



www.ayurvedah.in

कर्णिकारः परिव्याधो लकुचो लिकुचो डहुः ।
पनसः कण्टकिफलो निचुलो हिज्जलोऽम्बुजः ।। [109]

काकोदुम्बरिका फल्गुर्मलयूर्जघनेफला ।
अरिष्टः सर्वतोभद्रहिङ्गुनिर्यासमालकाः ।। [110]

पिचुमन्दश्च निम्बेऽथ पिच्छिलागुरुशिंशपा ।
कपिला भस्मगर्भा सा शिरीषस्तु कपीतनः ।। [111]

भण्डिलोऽप्यथ चाम्पेयश्चम्पको हेमपुष्पकः ।
एतस्य कलिका गन्धफली स्यादथ केसरे ।। [112]

बकुलो वञ्जुलोऽशोके समौ करकदाडिमौ ।
चाम्पेयः केसरो नागकेसरः काञ्चनाह्वयः ।। [113]

जया जयन्ती तर्कारी नादेयी वैजयन्तिका ।
श्रीपर्णमग्निमन्थः स्यात्कणिका गणिकारिका ।। [114]

जयोऽथ कुटजः शक्रो वत्सको गिरिमल्लिका ।
एतस्यैव कलिङ्गेन्द्रयवभद्रयवं फले ।। [115]

कृष्णपाकफलाविग्नसुषेणाः करमर्दके ।
कालस्कन्धस्तमालः स्यात्तापिच्छोऽप्यथ सिन्दुके ।। [116]

सिन्दुवारेन्द्रसुरसौ निर्गुण्डीन्द्राणिकेत्यपि ।
वेणी गरागरी देवताडो जीमूत इत्यपि ।। [117]

श्रीहस्तिनी तु भूरुण्डी तृणशून्यं तु मल्लिका ।
भूपदी शीतभीरुश्च सैवास्फोटा वनोद्भवा ।। [118]

शेफालिका तु सुवहा निर्गुण्डी नीलिका च सा ।
सितासौ श्वेतसुरसा भूतवेश्यथ मागधी ।। [119]

गणिका यूथिकाम्बष्ठा सा पीता हेमपुष्पिका ।
अतिमुक्तः पुण्ड्रकः स्याद्वासन्ती माधवी लता ।। [120]



www.ayurvedah.in

सुमना मालती जातिः सप्तला नवमालिका ।
माध्यं कुन्दं रक्तकस्तु बन्धूको बन्धुजीवकः ।। [121]

सहा कुमारी तरणिरम्लानस्तु महासहा ।
तत्र शोणे कुरबकस्तत्र पीते कुरण्टकः ।। [122]

नीली झिण्टी द्वयोर्बाणा दासी चार्तगलश्च सा ।
सैरेयकस्तु झिण्टी स्यात्तस्मिन्कुरबकोऽरुणे ।। [123]

पीता कुरण्टको झिण्टी तस्मिन्सहचरी द्वयोः ।
ओड्रपुष्पं जपापुष्पं वज्रपुष्पं तिलस्य यत्।। [124]

प्रतिहासशतप्रासचण्डातहयमारकाः ।
करवीरे करीरे तु क्रकरग्रन्थिलावुभौ ।। [125]

उन्मत्तः कितवो धूर्तो धत्तूरः कनकाह्वयः ।
मातुलो मदनश्चास्य फले मातुलपुत्रकः ।। [126]

फलपूरो बीजपूरो रुचको मातुलुङ्गके ।
समीरणो मरुवकः प्रस्थपुष्पः फणिज्जकः ।। [127]

जम्बीरोऽप्यथ पर्णासे कठिञ्जरकुठेरकौ ।
सितेऽर्जकोऽत्र पाठी तु चित्रको वह्निसंज्ञकः ।। [128]

अर्काह्ववसुकास्फोटगणरूपविकीरणाः ।
मन्दारश्चार्कपर्णोऽत्र शुक्लेऽलर्कप्रतापसौ ।। [129]

शिवमल्ली पाशुपत एकाष्ठीलो बुको वसुः ।
वन्दा वृक्षादनी वृक्षरुहा जीवन्तिकेत्यपि ।। [130]

वत्सादनी छिन्नरुहा गुडूची तन्त्रिकामृता ।
जीवन्तिका सोमवल्ली विशल्या मधुपर्ण्यपि ।। [131]

मूर्वा देवी मधुरसा मोरटा तेजनी स्रवा ।
मधूलिका मधुश्रेणी गोकर्णी पीलूपर्ण्यपि ।। [132]



www.ayurvedah.in

पाठाम्बष्ठा विद्धकर्णी स्थापनी श्रेयसी रसा ।
एकाष्ठीला पापचेली प्राचीना वनतिक्तिका ।। [133]

कटुः कटंभराशोकरोहिणी कटुरोहिणी ।
मत्स्यपित्ता कृष्णभेदी चक्राङ्गी शकुलादनी ।। [134]

आत्मगुप्ताजहाव्यण्डा कण्डूरा प्रावृषायणी ।
ऋष्यप्रोक्ता शूकशिम्बिः कपिकच्छुश्च मर्कटी ।। [135]

चित्रोपचित्रा न्यग्रोधी द्रवन्ती शम्बरी वृशा ।
प्रत्यक्श्रेणी सुतश्रेणी रण्डा मूषिकपर्ण्यपि ।। [136]

अपामार्गः शैखरिको धामार्गवमयूरकौ ।
प्रत्यक्पर्णी केशपर्णी किणिही खरमञ्जरी ।। [137]

हञ्जिका ब्राह्मणी पद्मा भार्गी ब्राह्मणयष्टिका ।
अङ्गारवल्ली बालेयशाकबर्बरवर्धकाः ।। [138]

मञ्जिष्ठा विकसा जिङ्गी समङ्गा कालमेषिका ।
मण्डूकपर्णी भण्डीरी भण्डी योजनवल्ल्यपि ।। [139]

यासो यवासो दुःस्पर्शो धन्वयासः कुनाशकः ।
रोदनी कच्छुरानन्ता समुद्रान्ता दुरालभा ।। [140]

पृश्निपर्णी पृथक्पर्णी चित्रपर्ण्यङ्घ्रिवल्लिका ।
क्रोष्टुविन्ना सिंहपुच्छी कलशी धावनी गुहा ।। [141]

निदिग्धिका स्पृशी व्याघ्री बृहती कण्टकारिका ।
प्रचोदनी कुली क्षुद्रा दुःस्पर्शा राष्ट्रिकेत्यपि ।। [142]

नीली काला क्लीतकिका ग्रामीणा मधुपर्णिका ।
रञ्जनी श्रीफली तुत्था द्रोणी दोला च नीलिनी ।। [143]

अवल्गुजः सोमराजी सुवल्लिः सोमवल्लिका ।
कालमेषी कृष्णफली वाकुची पूतिफल्यपि ।। [144]

www.ayurvedah.in

कृष्णोपकुल्या वैदेही मागधी चपला कणा ।
उषणा पिप्पली शौण्डी कोलाथ करिपिप्पली ।। [145]

कपिवल्ली कोलवल्ली श्रेयसी वशिरः पुमान्।
चव्यं तु चविका काकचिञ्चीगुञ्जे तु कृष्णला ।। [146]

पलंकषा त्विक्षुगन्धा श्वदंष्ट्रा स्वादुकण्टकः ।
गोकण्टको गोक्षुरको वनशृङ्गाट इत्यपि ।। [147]

विश्वा विषा प्रतिविषातिविषोपविषारुणा ।
शृङ्गी महौषधं चाथ क्षीरावी दुग्धिका समे ।। [148]

शतमूली बहुसुताभीरूरिन्दीवरी वरी ।
ऋष्यप्रोक्ताभीरुपत्त्रीनारायण्यः शतावरी ।। [149]

अहेरुरथ पीतद्रुकालीयकहरिद्रवः ।
दार्वी पचम्पचा दारुहरिद्रा पर्जनीत्यपि ।। [150]

वचोग्रगन्धा षड्ग्रन्था गोलोमी शतपर्विका ।
शुक्ला हैमवती वैद्यमातृसिंह्यौ तु वाशिका ।। [151]

वृषोऽटरूषः सिंहास्यो वासको वाजिदन्तकः ।
आस्फोटा गिरिकर्णी स्याद्विष्णुक्रान्तापराजिता ।। [152]

इक्षुगन्धा तु काण्डेक्षुकोकिलाक्षेक्षुरक्षुराः ।
शालेयः स्याच्छीतशिवश्छत्त्रा मधुरिका मिसिः ।। [153]

मिश्रेयाप्यथ सीहुण्डो वज्रः स्नुक्स्त्री स्नुही गुडा ।
समन्तदुग्धाथो वेल्लममोघा चित्रतण्डुला ।। [154]

तण्डुलश्च कृमिघ्नश्च विडङ्गं पुंनपुंसकम् ।
बला वाट्यालका घण्टारवा तु शणपुष्पिका ।। [155]

मृद्वीका गोस्तनी द्राक्षा स्वाद्वी मधुरसेति च ।
सर्वानुभूतिः सरला त्रिपुटा त्रिवृता त्रिवृत्।। [156]



www.ayurvedah.in

त्रिभण्डी रोचनी श्यामापालिन्ध्यौ तु सुषेणिका ।
काला मसूरविदलार्धचन्द्रा कालमेषिका ।। [157]

मधुकं क्लीतकं यष्टिमधुकं मधुयष्टिका ।
विदारी क्षीरशुक्लेक्षुगन्धा क्रोष्ट्री तु या सिता ।। [158]

अन्या क्षीरविदारी स्यान्महाश्वेतर्क्षगन्धिका ।
लाङ्गली शारदी तोयपिप्पली शकुलादनी ।। [159]

खराश्वा कारवी दीप्यो मयूरो लोचमस्तकः ।
गोपी श्यामा सारिवा स्यादनन्तोत्पलसारिवा ।। [160]

योग्यमृद्धिः सिद्धिलक्ष्म्यौ वृद्धेरप्याह्वया इमे ।
कदली वारणबुसा रम्भा मोचांशुमत्फला ।। [161]

काष्ठीला मुद्गपर्णी तु काकमुद्गा सहेत्यपि ।
वार्त्ताकी हिङ्गुली सिंही भण्टाकी दुष्प्रधर्षिणी ।। [162]

नाकुली सुरसा रास्ना सुगन्धा गन्धनाकुली ।
नकुलेष्टा भुजंगाक्षी छत्त्राकी सुवहा च सा ।। [163]

विदारिगन्धांशुमती शालपर्णी स्थिरा ध्रुवा ।
तुण्डिकेरी समुद्रान्ता कार्पासी बदरेति च ।। [164]

भारद्वाजी तु सा वन्या श्रृङ्गी तु ऋषभो वृषः ।
गाङ्गेरुकी नागबला झषा ह्रस्वगवेधुका ।। [165]

धामार्गवो घोषकः स्यान्महाजाली स पीतकः ।
ज्योत्स्नी पटोलिका जाली नादेयी भूमिजम्बुका ।। [166]

स्याल्लाङ्गलिक्यग्निशिखा काकाङ्गी काकनासिका ।
गोधापदी तु सुवहा मुसली तालमूलिका ।। [167]

अजश्रृङ्गी विषाणी स्याद्गोजिह्वादार्विके समे ।
ताम्बूलवल्ली ताम्बूली नागवल्ल्यप्यथ द्विजा ।। [168]

www.ayurvedah.in

हरेणू रेणुका कौन्ती कपिला भस्मगन्धिनी ।
एलावालूकमैलेयं सुगन्धि हरिवालूकम् ।। [169]

वालूकं चाथ पालङ्क्यां मुकुन्दः कुन्दकुन्दुरू ।
बालं ह्रीवेरबर्हिष्ठोदीच्यं केशाम्बुनाम च ।। [170]

कालानुसार्यवृद्धाश्मपुष्पशीतशिवानि तु ।
शैलेयं तालपर्णी तु दैत्या गन्धकुटी मुरा ।। [171]

गन्धिनी गजभक्ष्या तु सुवहा सुरभी रसा ।
महेरणा कुन्दुरुकी सल्लकी ह्लादिनीति च ।। [172]

अग्निज्वालासुभिक्षे तु धातकी धातुपुष्पिका ।
पृथ्वीका चन्द्रबालैला निष्कुटिर्बहुलाथ सा ।। [173]

सूक्ष्मोपकुञ्चिका तुत्था कोरङ्गी त्रिपुटा त्रुटिः ।
व्याधिः कुष्ठं पारिभाव्यं वाप्यं पाकलमुत्पलम् ।। [174]

शङ्खिनी चोरपुष्पी स्यात्केशिन्यथ वितुन्नकः ।
झटामलाज्झटा ताली शिवा तामलकीति च ।। [175]

प्रपौण्डरीकं पौण्डर्यमथ तुन्नः कुबेरकः ।
कुणिः कच्छः कान्तलको नन्दिवृक्षोऽथ राक्षसी ।। [176]

चण्डा धनहरी क्षेमदुष्पत्त्रगणहासकाः ।
व्याडायुधं व्याघ्रनखं करजं चक्रकारकम् ।। [177]

सुषिरा विद्रुमलता कपोताङ्घ्रिर्नटी नली ।
धमन्यञ्जनकेशी च हनुर्हट्टविलासिनी ।। [178]

शुक्तिः शङ्खः खुरः कोलदलं नखमथाढकी ।
काक्षी मृत्स्ना तुबरिका मृत्तालकसुराष्ट्रजे ।। [179]

कुटन्नटं दाशपुरं वानेयं परिपेलवम् ।
प्लवगोपुरगोनर्दकैवर्तीमुस्तकानि च ।। [180]


www.ayurvedah.in

ग्रन्थिपर्णं शुकं बर्हं पुष्पं स्थौणेयकुक्कुरे ।
मरुन्माला तु पिशुना स्पृक्का देवी लता लघुः ।। [181]

समुद्रान्ता वधूः कोटिवर्षा लङ्कोपिकेत्यपि ।
तपस्विनी जटामांसी जटिला लोमशामिषी ।। [182]

त्वक्पत्त्रमुत्कटं भृङ्गं त्वचं चोचं वराङ्गकम् ।
कर्चूरको द्राविडकः काल्पको वेधमुख्यकः ।। [183]

ओषध्यो जातिमात्रे स्युरजातौ सर्वमौषधम् ।
शाकाख्यं पत्त्रपुष्पादि तण्डुलीयोऽल्पमारिषः ।। [184]

विशल्याग्निशिखानन्ता फलिनी शक्रपुष्पिका ।
स्याद् ऋक्षगन्धा छगलान्त्र्यावेगी वृद्धदारकः ।। [185]

जुङ्गो ब्राह्मी तु मत्स्याक्षी वयःस्था सोमवल्लरी ।
पटुपर्णी हैमवती स्वर्णक्षीरी हिमावती ।। [186]

हयपुच्छी तु काम्बोजी माषपर्णी महासहा ।
तुण्डिकेरी रक्तफला बिम्बिका पीलूपर्ण्यपि ।। [187]

बर्बरा कवरी तुङ्गी खरपुष्पाजगन्धिका ।
एलापर्णी तु सुवहा रास्ना युक्तरसा च सा ।। [188]

चाङ्गेरी चुक्रिका दन्तशठाम्बष्ठाम्ललोणिका ।
सहस्रवेधी चुक्रोऽम्लवेतसः शतवेध्यपि ।। [189]

नमस्कारी गण्डकारी समङ्गा खदिरेत्यपि ।
जीवन्ती जीवनी जीवा जीवनीया मधुस्रवा ।। [190]

कूर्चशीर्षो मधुरकः श्रृङ्गह्रस्वाङ्गजीवकाः ।
किराततिक्तो भूनिम्बोऽनार्यतिक्तोऽथ सप्तला ।। [191]

विमला सातला भूरिफेना चर्मकषेत्यपि ।
वायसोली स्वादुरसा वयःस्थाथ मकूलकः ।। [192]



www.ayurvedah.in

निकुम्भो दन्तिका प्रत्यक्श्रेण्युदुम्बरपर्ण्यपि ।
अजमोदा तूग्रगन्धा ब्रह्मदर्भा यवानिका ।। [193]

मूले पुष्करकाश्मीरपद्मपत्त्राणि पौष्करे ।
अव्यथातिचरा पद्मा चारटी पद्मचारिणी ।। [194]

काम्पिल्यः कर्कशश्चन्द्रो रक्ताङ्गो रोचनीत्यपि ।
प्रपुन्नाडस्त्वेडगजो दद्रुघ्नश्चक्रमर्दकः ।। [195]

पद्माट उरणाख्यश्च पलाण्डुस्तु सुकन्दकः ।
लतार्कदुर्द्रुमौ तत्र हरितेऽथ महौषधम् ।। [196]

लशुनं गृञ्जनारिष्टमहाकन्दरसोनकाः ।
पुनर्नवा तु शोथघ्नी वितुन्नं सुनिषण्णकम् ।। [197]

स्याद् वातकः शीतलोऽपराजिता शणपर्ण्यपि ।
पारावताङ्घ्रिः कटभी पण्या ज्योतिष्मती लता ।। [198]

वार्षिकं त्रायमाणा स्यात्त्रायन्ती बलभद्रिका ।
विष्वक्सेनप्रिया गृष्टिर्वाराही बदरेत्यपि ।। [199]

मार्कवो भृङ्गराजः स्यात्काकमाची तु वायसी ।
शतपुष्पा सितच्छत्त्रातिच्छत्रा मधुरा मिसिः ।। [200]

अवाक्पुष्पी कारवी च सरणा तु प्रसारिणी ।
तस्यां कटंभरा राजबला भद्रबलेत्यपि ।। [201]

जनी जतूका रजनी जतुकृच्चक्रवर्तिनी ।
संस्पर्शाथ शटी गन्धमूली षड्ग्रन्थिकेत्यपि ।। [202]

कर्चूरोऽपि पलाशोऽथ कारवेल्लः कठिल्लकः ।
सुषवी चाथ कुलकं पटोलस्तिक्तकः पटुः ।। [203]

कूष्माण्डकस्तु कर्कारुरुर्वारुः कर्कटी स्त्रियौ ।
इक्ष्वाकुः कटुतुम्बी स्यात्तुम्ब्यलाबूरुभे समे ।। [204]

चित्रा गवाक्षी गोडुम्बा विशाला त्विन्द्रवारुणी ।
अर्शोघ्नः शूरणः कन्दो गण्डीरस्तु समष्ठिला ।। [205]

कलम्ब्युपोदिका स्त्री तु मूलकं हिलमोचिका ।
वास्तुकं शाकभेदाः स्युर्दूर्वा तु शतपर्विका ।। [206]

सहस्रवीर्याभार्गव्यौ रुहानन्ताथ सा सिता ।
गोलोमी शतवीर्या च गण्डाली शकुलाक्षका ।। [207]

कुरुविन्दो मेघनामा मुस्ता मुस्तकमस्त्रियाम् ।
स्याद्भद्रमुस्तको गुन्द्रा चूडाला चक्रलोच्चटा ।। [208]

वंशे त्वक्सारकर्मारत्वचि सारतृणध्वजाः ।
शतपर्वा यवफलो वेणुमस्करतेजनाः ।। [209]

वेणवः कीचकास्ते स्युर्ये स्वनन्त्यनिलोद्धताः ।
ग्रन्थिर्ना पर्वपरुषी गुन्द्रस्तेजनकः शरः ।। [210]

नडस्तु धमनः पोटगलोऽथो काशमस्त्रियाम् ।
इक्षुगन्धा पोटगलः पुंसि भूम्नि तु बल्वजाः ।। [211]

रसाल इक्षुस्तद्भेदाः पुण्ड्रकान्तारकादयः ।
स्याद्वीरणं वीरतरं मूलेऽस्योशीरमस्त्रियाम् ।। [212]

अभयं नलदं सेव्यममृणालं जलाशयम् ।
लामज्जकं लघुलयमवदाहेष्टकापथे ।। [213]

नडादयस्तृणं गर्मुच्छ्यामाकप्रमुखा अपि ।
अस्त्री कुशं कुथो दर्भः पवित्रमथ कत्तृणम् ।। [214]

पौरसौगन्धिकध्यामदेवजग्धकरौहिषम् ।
छत्त्रातिच्छत्त्रपालघ्नौ मालातृणकभूस्तृणे ।। [215]

शष्पं बालतृणं घासो यवसं तृणमर्जुनम् ।
तृणानां संहतिस्तृण्या नड्या तु नडसंहतिः ।। [216]



www.ayurvedah.in

तृणराजाह्वयस्तालो नालिकेरस्तु लाङ्गली ।
घोण्टा तु पूगः क्रमुको गुवाकः खपुरोऽस्य तु ।। [217]

फलमुद्वेगमेते च हिन्तालसहितास्त्रयः ।
खर्जूरः केतकी ताली खर्जूरी च तृणद्रुमाः ।। [218]

**************************************************

e-publication of www.ayurveda.in .
Online FREE in pdf format

1. Āyurveda books
   a. Astanga Hridayam
   b. Astanga Samgraha
   c. Charaka Samhita
   d. Madhava nidanam
   e. Sarangadhara Samhita
   f. Sushruta Samhita
2. Contemporary books
   a. Agastiya Ratnapariksa
   b. Amarakosa
   c. Ashtadhyayi
   d. Garbhopanisat
   e. Gheranda Samhita
   f. Goraksa Shataka
   g. Hatyoga pradipika
   h. Kamasutra
3. Other books
   a. **Puranas**
   b. **upanishadas**

www.ayurvedah.in

Other publications (Hard copy) Published or Marketed by **aarsha**, Jaipur and available on [www.ayurveda.in](http://www.ayurveda.in)

1. Tatvabodha Commentary (of Sivadas Sen) on Astanga hridaya **Rs 300/-**
2. Bhanumati Commentary (of Chakrapani dutta)on Sushruta Samhita **Rs 150/-**
3. Charakatatvapradipika Commentary (of Sivadas Sen) on Charaka Samhita **Rs 300/-**
4. Charakopaskara commentary (of Sivadas Sen) on Charaka Samhita **Rs 300/-**
5. Chanda in Ayurveda Samhita
   :student edition **Rs 175** ( original price Rs 300)
6. madhavaniadna Avavodha 2
   :student edition **Rs 300** ( original price Rs 495)
7. madhavanidana Anusthana I
   :student edition **Rs 600** ( original price Rs 1095)
8. madhavanidana Anusthana II
   :student edition **Rs 700** ( original price Rs 1195)
9. Madhavanidana patha
   :student edition **Rs 500** ( original price Rs 895)

**aarsha**, jaipur

Plot no. 4, Khandelwal nagar Extn,
Near Premnagar pulia, Agra Road,
Jaipur- 302031, Rajasthan



www.ayurvedah.in